CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

५७०८

इतिकूर्म्मपुराणे अध्यायः ४८
कूर्म्मद्वपि भागावत्तम्र
समाप्त ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥कू.पु.॥ श्रीगणेशाय नमः॥ ॥नमस्कृत्वाप्रमेयाय विष्णवे कूर्मरूपिणे। पुराणं संप्रवक्ष्यामि यदुक्तं विश्वयोनिना॥१॥संत्रा
॥१॥ न्ते सूतमनघं नैमिषेयाः शौनकादयः। पुराणसंहितां पुण्यां पप्रच्छू रोमहर्षणं॥२॥त्वया सूत महाबुद्धे भगवान् ब्रह्मवित्त
मः। इतिहासपुराणार्थं व्यासः सम्यगुपासितः॥३॥तस्य ते सर्वरोमाणि वचसा हर्षितानि यत्। द्वैपायनस्य तु भवांस्ततो वै रो
महर्षणः॥४॥भवंतमेव भगवान् व्याजहार स्वयं प्रभुः। मुनीनां संहितां वक्तुं व्यासः पौराणिकीं कथां॥५॥त्वं हि स्वायंभुवे
यज्ञे सुत्याहे वितते सति। संभूतः संहितां वक्तुं स्वांशेन पुरुषोत्तमः॥६॥तस्माद्भवंतं पृच्छामः पुराणं कौर्म्ममुत्तमं। वक्तुम
र्हसि चास्माकं पुराणार्थविशारद। मुनीनां वचनं श्रुत्वा सूतः पौराणिकोत्तमः॥७॥प्रणम्य मनसा प्राह गुरुं सत्यवती
सुतं॥रोमहर्षण उवाच॥नमस्कृत्वा जगद्योनिं कूर्मरूपधरं हरिं॥ वक्ष्ये पौराणिकीं दिव्यां कथां पापप्रणाशिनीं।
यां श्रुत्वा पापकर्मापि गच्छेत परमां गतिं॥ न नास्तिके कथां पुण्यामिमां ब्रूयात्कदाचन॥श्रद्दधानाय शांताय धार्मि
काय द्विजातये॥ इमां कथामनुब्रूयात्साक्षान्नारायणोदितां॥सर्गश्च प्रतिसर्गश्च वंशो मन्वंतराणि च। वंशानुचरितं
चैव पुराणं पंचलक्षणं॥ ब्राह्मं पुराणं प्रथमं पाद्मं वैष्णवमेव च॥शैवं भागवतं चैव भविष्यं नारदीयकं॥मार्कंडेयमथा ॥तपाः॥
ग्नेयं ब्रह्मवैवर्त्तमेव च॥लैंगं तथा च वाराहं स्कांदं वामनमेव च॥कौर्म्मं मात्स्यं गारुडं च वायवीयमनंतरं॥अष्टादश ॥१॥
कमुद्दिष्टं ब्रह्मांडमिति संज्ञितं॥अन्यान्युपपुराणानि मुनिभिः कथितानि तु॥अष्टादशपुराणानि श्रुत्वा सं
क्षेपतो द्विजाः॥आद्यं सनत्कुमारोक्तं नारसिंहमथापरं॥तृतीयं स्कंदमुद्दिष्टं कुमारेण तु भाषितं॥चतुर्थं शिवधर्म्म

पौराण्यं माहात्म्यं त्रैदीश भाषितं ॥ उर्वीस सोक्रमाश्रुत्य नारदो क्रमनः परं ॥ माहात्म्यं नथाशास्त्रं सौरसर्वार्थ संचयं ॥ पतस्या क्रमपदं
मार्ग । वैभार्क्क राज्यम् ॥ इदं पंचदशमे पुराणं कौर्म्ममुत्तमम् ॥ चतुःसंस्थितं पुण्यं संहितानां प्रभेदतः ॥ ब्राह्मी भागवती सौ
री वैष्णवी च प्रकीर्त्तिता ॥ चतस्रः संहिताः पुण्याः सर्वपापप्रणाशनीः ॥ इयंतु संहिता ब्राह्मी चतुर्वेदेन सम्मिता ॥ भवन्ति षट्
सहस्राणि श्लोकानामत्र संख्यया ॥ यत्र धर्मार्थकामानां मोक्षस्य च मुनीश्वराः ॥ माहात्म्यमखिलं ब्रह्म ज्ञायते परमेश्वरः ॥
सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ॥ वंशानुचरितं श्चैव दिव्याः प्रासंगिकीः कथाः ॥ ब्राह्मणाद्यैरियं धार्या धार्मिकैः
शान्तमानसैः ॥ तामहं वर्णयिष्यामि व्यासेन कथितां पुरा ॥ पुरामृतार्थं दैतेया दानवैः सह देवताः ॥ मंथानं मंदरं कृत्वा मम
न्थुः क्षीरसागरम् ॥ मथ्यमाने तदा तस्मिन्कूर्मरूपी जनार्दनः ॥ बभार मंदरं देवो देवानां हितकाम्यया ॥ देवाश्च तुष्टु
वुर्देवं नारदाद्या महर्षयः ॥ कूर्मरूपधरं दृष्ट्वा साक्षिणं विष्णुमव्ययं ॥ तदंतरे ऽभवद्देवी श्री नारायणवल्लभा ॥ जगाह
भगवान्विष्णुस्तामेव पुरुषोत्तमः ॥ तेजसा विष्णुम[illegible]क्तं नारदाद्या महर्षयः ॥ मोहिताः सह शक्रेण श्रिया वचनमब्रुव
न् ॥ भगवन्देवदेवेश नारायण जगन्मयो ॥ केयं देवी विशालाक्षी यथावद्ब्रूहि पृच्छतां ॥ श्रुत्वा तेषां तदा वाक्यं विष्णुर्दा
नवमर्द्दनः ॥ प्रोवाच देवीं संप्रेक्ष्य नारदादीनकल्मषान् ॥ इयं सा परमा शक्तिर्मन्मयी ब्रह्मरूपिणी ॥ माया मम
प्रियानन्ता ययेदं मोहितं जगत् ॥ अनयैव जगत्सर्वं सदेवासुरमानुषं ॥ मोहयामि द्विजश्रेष्ठाः ग्रसामि विसृजामि
च ॥ उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिं ॥ विज्ञाय वीक्ष्य चात्मानं तरन्ति विपुलामिमां ॥ अस्यास्त्वंशमधि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥कू॰पु॥
॥२॥

शायशक्तिमंतोभवद्विजाः॥ प्रसेशानानस्यो देवाः सर्वशक्तिरियंमम॥ सैषा सर्वजगत्सूतिः प्रकृतिस्त्रिगुणात्मिका॥ प्रागेव
मत्तः संजाताश्रीः कल्पेपद्मवासिनी॥ चतुर्भुजा शंखचक्रपद्महस्ता शुभान्विता॥ कोटिसूर्यप्रतीकाशा मोहिनी सर्वदेहिनां
नालंदेवा न पितरो मानवा वासवा पिवा॥ मायामिमां समुत्तर्तुं ये चान्ये चैव देहिनः॥ इमुक्ता वासुदेवेन मुनयो विष्णुमनु
वन्॥ ब्रूहि न पुराणश्रीकाक्षयदि कालत्रयोपिते॥ सुप्रथोवाच हृषीकेशो मुनिभिरन्वितः॥ ज्ञास्लिद्विजातिप्रवरं ऽसुग्रहंति
कृतं॥ पर्वजन्मनि राजासावद्गुवाः शंकरादिभिः॥ दृष्ट्वा मां कूर्मसंस्थानं श्रुत्वा पौराणिकीं स्वयं॥ संहितां मन्मुखाद्दिव्यां पुर
स्कृत्यमुनीश्वरः॥ ब्रह्माणं च महादेवं देवांश्चान्यांश्च शक्तितः॥ मच्छक्तौ संस्थितान्बुद्ध्वा मामेव शरणंगतः॥ संभाषितो मयाचा
थब्रह्मयोनिंगमिष्यसि॥ इदमुग्रमहंनित्यानोज्ञानिस्मरसिपौर्विकीं॥ सर्वेषामेवभूतानांदेवानामप्यगोचरं॥ वक्ष्यंयदु
ह्यं न मंदस्य ज्ञानं न वानयं॥ ज्ञानं नेष्यामकं ज्ञानं मामेवां नेप्रवेक्ष्यसि॥ अंशांनरेन्द्रभूपानां त्वं नत्र विप्रः पतिर्हितः॥
वैवस्वतान्तरे प्राप्ते कार्यार्थं मां प्रवेक्ष्यसि॥ मां प्रणम्य पुरीं गत्वा पालयामास मेदिनीं॥ कालधर्मंगतःकालात्मस्वे
तद्दीपं मयातत॥ भुक्त्वानाहं भवाभोगान्योगिनामप्यगोचरान्॥ मदाज्ञया मुनिश्रेष्ठा जज्ञे विप्रकुले पुनः॥ ज्ञात्वा मां ॥रामः॥
वासुदेवाख्यं यत्र चेतिहितोऽक्षरं॥ विद्याविद्येनूपरूपेणयद्गुलपरमं विदुः॥ सो चैव यः सर्वभूतानामाश्रयं परमेश्वरं॥ व्र ॥२॥
तोपवासनियमैर्होमैर्ब्राह्मणतर्पणैः॥ अज्ञशीलवनं तत्स्थेस्तत्त्रितत्परायणाः॥ आराधयन्महादेवं योगिनां
हृदि संस्थितं॥ तस्यैवं वर्तमानस्य कदाचित्परमा कला॥ स्वरूपं दर्शयामास दिव्यं विष्णुसमुद्भवं॥ दृष्ट्वा प्रणम्य शि

2

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रमा विष्णोर्भगवतः प्रभां ॥ संस्तूय विविधैः स्तोत्रैः कृतांजलिरभाषत ॥ ईश्वर्युवाच ॥ कात्वं देवि विशालाक्षि विष्णुविसांकि
नेशुभे ॥ याथातथ्येन वै भावं त्वदिदानीं ब्रवीहि मे ॥ तस्य तद्वाक्यमाकर्ण्य तु प्रसन्नात्मं मंगलाः सनीसंस्मारं हितुप्रियं ब्रा
ह्मणामब्रवीत् ॥ न मां पश्यन्ति मुनयो देवाः शक्रपुरोगमाः ॥ नारायणात्मिका मेकामायाहं तन्मयी परा ॥ न मे नारायणाद्भे
दो विद्यते हि विचारतः ॥ तन्मयाहं परं ब्रह्म स विष्णुः परमेश्वरः ॥ येर्चयन्ति हि भक्त्या नानामाश्रयं परमेश्वरम् ॥ ज्ञानेन कर्म
योगेन तेषां प्रभवाम्यहं ॥ तस्मादनादिनिधनं कर्मयोगपरायणः ॥ ज्ञानेनाराधयानन्तं ततो मोक्षमवाप्स्यसि ॥ ६
त्युक्तः सम्प्रतिश्रेष्ठं ईश्वरो महामते ॥ प्रणम्य शिरसा देवीं प्रांजलिः पुनरब्रवीत् ॥ कथं स भगवानीशः शाश्वतो निष्कलोच्यु
तः ॥ ज्ञातुं हि शक्यते देवि ब्रूहि मे परमेश्वरि ॥ एवमुक्ताथ विप्रेन्द्रा देवी कमलवासिनी ॥ साक्षान्नारायणो ज्ञानं दास्यती
त्याह तं मुनिं ॥ उभाभ्यामथ हस्ताभ्यां संस्पृश्य प्रणतं मुनिं ॥ स्मृत्वा परात्परं विष्णुं तत्रैवान्तरधीयत ॥ सोपि नारायणं
द्रष्टुं परमेण समाधिना ॥ आराधयेद्धृषीकेशं प्रणतार्तिप्रभंजनम् ॥ ततो बहुतिथे कालेन तेन नारायणः स्वयं ॥ प्रा
दुरासीन्महायोगी पीतवासा जगन्मयः ॥ दृष्ट्वा देवं समायान्तं विष्णुमात्मानमव्ययं ॥ जानुभ्यामवनीं गत्वा तुष्टाव गा
रुडध्वजं ॥ ईश्वर उवाच ॥ यज्ञेशाच्युत गोविंद माधवानन्त केशव ॥ कृष्ण विष्णो हृषीकेश तुभ्यं विश्वात्मने नमः ॥
नमोस्तु ते पुराणाय पवित्रहृपाय ते नमः ॥ नमस्ते वासुदेवाय विष्णवे विश्वयोनये ॥ सर्गस्थितिविनाशानां हेतवे
नंतशक्तये ॥ निर्गुणाय नमस्तुभ्यं निष्कलायात्मने नमः ॥ आदिमध्यान्तहीनाय ज्ञानगम्याय ते नमः ॥ नमस्तेस्ति

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निर्विकाराय निःप्रपंचाय ते नमः ॥ भेदाभेदविहीनाय नमोस्त्वानंदरूपिणे ॥ नमस्ताराय शान्ताय नमोप्रतिहतात्मने ॥
अनन्तमूर्त्तये तुभ्यममूर्त्ताय नमो नमः ॥ नमस्ते परमेशाय मायातीताय ते नमः ॥ नमः शिवाय शुद्धाय नमस्ते परमे
ष्ठिने ॥ त्वयैव सृष्टमखिलं त्वमेव परमा गतिः ॥ त्वं पिता सर्वभूतानां त्वं माता पुरुषोत्तम ॥ त्वमक्षरं परं धाम चिन्मा
त्रं व्योम निष्कलं ॥ सर्वस्याधारमव्यक्तमनन्तं तमसः परं ॥ प्रपश्यन्ति परात्मानं ज्ञानदीपेन केवलं ॥ प्रपद्ये भवतो रूपं त
द्विष्णोः परमं पदं ॥ एवं स्तुवन्तं भगवान्भूतात्मा भूतभावनः ॥ उभाभ्यामथ हस्ताभ्यां पस्पर्श प्रहसन्निव ॥ स्पृष्टमात्रो
भगवता विष्णुना मुनिपुंगव ॥ यथावत्परमं तत्त्वं ज्ञातवांस्तत्प्रसादतः ॥ प्रहृष्टमनसा प्रणिपत्य जनार्दनं ॥ प्रोवा
चोन्निद्रपद्माक्षं पीतवाससमच्युतं ॥ त्वत्प्रसादादसंदिग्धमुत्पन्नं पुरुषोत्तम ॥ ज्ञानं ब्रह्मैकविषयं परमानन्दसिद्धि
दं ॥ नमो भगवते नित्यं वासुदेवाय हेतवे ॥ किं करिष्यामि योगेश तन्मे वद जगन्मय ॥ श्रुत्वा नारायणो वाक्यमिंद्रद्यु
म्नस्य माधवः ॥ उवाच सस्मितं वाक्यमशेषजगतो हितं ॥ भगवानुवाच ॥ वर्णाश्रमाचारवतां पुंसां देवो महेश्वरः ॥ ज्ञानेन भ
क्तियोगेन पूजनीयो न चान्यथा ॥ विज्ञाय तत्परं तत्त्वं विभूतिं कार्यकारणं ॥ प्रवृत्तिं चापि ज्ञानेन मोक्षार्थी प्रवर्त्ते
येन ॥ सर्वसंगान्परित्यज्य ज्ञात्वा मायामयं जगत् ॥ अद्वैतं भावयात्मानं द्रक्ष्यसे परमेश्वरं ॥ त्रिविधां भावनां ब्रह्मन्प्रोच्य
मानां निबोध मे ॥ एका मद्विषया चान्या द्वितीया व्यक्तसंश्रया ॥ आद्या च भावना ब्राह्मी विज्ञेया सा गुणातिगा ॥ आसामन्
यतमां चाथ भावनां भावयेद्बुधः ॥ अशक्तः संश्रयेदाद्यामित्येषा वैदिकी श्रुतिः ॥ तस्मात्सर्वप्रयत्नेन तन्निष्ठस्तत्पराय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णः॥ समाराधय विश्वेशं ततो मोक्षमवाप्स्यसि॥ इन्द्रद्युम्न उवाच। किं तत्परतरं तत्त्वं का विभूतिर्जनार्दन॥ किं कार्यं कारणं
कस्त्वं प्रवृत्तिश्चापि केशव॥ भगवानुवाच॥ परात्परतरं तत्त्वं परं ब्रह्मैकमव्ययं॥ नित्यानन्दं स्वयंज्योतिरक्षरं तमसः परं
सर्गस्थित्यन्तकर्तृत्वं प्रवृत्तिर्मम गीयते। एतद्धिताय भावेन यथावत्कथितं द्विज॥ ततस्त्वं कर्मयोगेन शाश्वतं समपूज
येय॥ केनैव वर्णाश्रमाचारैः समाराधयते परः॥ तानं च कीदृशं दिव्यभावनात्र यसंस्थिता॥ कथं स्रष्टुमिदं पूर्वं कथं सं
सद्रिं तपुनः॥ किमस्य स्पृष्टयो लोकाश्च शासनं च नराणि च॥ कानि तेषां प्रमाणानि पापवनानि वनानि च॥ तीर्थान्यक्री
दिसंस्थानं पृथिव्यायामविस्तरम्॥ कति द्वीपाः समुद्राश्च पर्वताः सनदीनदाः॥ ब्रूहि मे पुण्डरीकाक्ष यथावदनु
नाखिलं मम॥ एवमुक्तोऽथ तेनासौ भक्त्यानुग्रहकाम्यया॥ यथावत्कथितं सर्वमवावं मुनिपुंगवाः॥ व्याख्यायाशेषमेतौ
दयन्न हो हृहितं ततः॥ अनुज्ञाप्य च तं विप्रं तत्रैवान्तर्हितोऽभवत्॥ सोऽपि तेन विधानेन मयाऽक्तेन द्विजोत्तमाः॥ आराधया
मास परं भावपूतः समाहितः॥ त्यक्त्वा पुत्रादिषु स्नेहं निर्द्वन्द्वो निःपरिग्रहः॥ सन्न्यस्य सर्वकर्माणि परं वैराग्यमास्थितः
आत्मन्यात्मानमावेश्य स्वात्मन्येवाखिलं जगत्॥ संप्राप्य भावनामग्र्यां त्यक्त्वा मन्दरपूर्विकं॥ स्त्रवाप परमं योगं ये
नैकं परिपश्यति॥ यं विनिद्रा जितश्वासाः कांक्षन्ते मोक्षकांक्षिणः॥ ततः कदाचिद्योगीन्द्रो ब्रह्माणं द्रष्टुमव्ययं॥
जगाम दिव्ययनिर्देशान्मानसोत्तरपर्वतं॥ आकाशेनैव विप्रेन्द्रो योगैश्वर्यप्रभावतः॥ विमानं सूर्यसंकाशं प्रा
दुर्भूतमनुत्तमं॥ अन्वगच्छन् देवगणा गंधर्वाप्सरसां गणाः॥ दृष्ट्वान्ये पथि योगीन्द्रं सिद्धा ब्रह्मर्षयो ययुः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥कूर्म॥ नमः सगणासिविरिंचिविश्वेशस्तुतवंदिने ॥ ध्यायमानयोगिभिर्हृत्पद्मे नमस्ते परमः पुमान् ॥ सं प्राप्य परमं स्थानं सर्वार्थानुसमप्रभं ॥ विवेश
॥४॥ वांतर्भवनं देवानां वड़राम्सदं ॥ विचिंतयामास परं सराराप सर्वदेहिनां ॥ अनादिनिधनं देवं देवदेवं पितामहं ॥ नमः प्रादुरभूत्तस्
स्मिन्नकाशः परमाद्भुतः ॥ तन्मध्ये पुरुषं सर्वमपश्यत्परमं पदं ॥ महांतं तेजसो राशिमगम्यं ब्रह्मविद्विषां ॥ चतुर्भुजमुदारांग
मर्चिभिरुपशोभितं ॥ सोपि योगिनमन्वीक्ष्य प्रमाणामं तमुपस्थितं ॥ प्रत्युद्गम्य स्वयं देवो विश्वात्मा परिषस्वजे ॥ परिष्वक्तस्य
देवेन द्विजेंद्रस्याथ पदेहतः ॥ निर्गत्य महती ज्योत्स्ना विवेशादित्यमंडलं ॥ ऋग्यजुःसामसंज्ञं तत्पवित्रममलं पदं ॥ हिरण्यग
र्भो भगवान् यत्रास्ते हव्यकव्यभुक् ॥ द्वारं तद्योगिनामाद्यं वेदांतेषु प्रतिष्ठितं ॥ ब्रह्मतेजोमयं श्रीमन्निष्ठा चैव मनीषि
णां ॥ दृष्टमात्रो भगवता ब्रह्मणा चिन्मयेन स ॥ अपश्यदैश्वरं तेजो शांतं सर्वत्रगं शिवं ॥ स्वात्मानमक्षरं व्योम तद्विष्णोः
परमं पदं ॥ आनंदमचलं ब्रह्मस्थानं तत्पारमेश्वरं ॥ सर्वभूतात्मभूतस्थः स वै मैश्वर्यतत्प्रियः ॥ प्राप्तवानात्मनो धामय
त्तन्मोक्षाख्यमव्ययं ॥ तस्मात्सर्वप्रयत्नेन वर्णाश्रमविधौ स्थितः ॥ समाश्रित्यांतिमं भावं मायां लक्ष्मीं तरेद्बुधः ॥ सू
त उवाच ॥ व्याहृता हरिणा त्वेवं नारदाद्या महर्षयः ॥ शक्रेण सहिताः सर्वे पप्रच्छुर्गरुडध्वजं ॥ ऋषय ऊचुः ॥ देवदे
व हृषीकेश नाथ नारायणाव्ययः ॥ तद्वदाशेषमस्माकं यदुक्तं भवता पुरा ॥ इंद्रद्युम्नाय विप्राय ज्ञानं धर्मादिगोच ॥रामः॥
रं ॥ शुश्रूषुश्चाप्ययं शक्रः सखा तव जगन्मय ॥ ततः स भगवान्विष्णुः कूर्मरूपी जनार्दनः ॥ रसातलगतो देवो नार ॥४॥
दाद्यैर्महर्षिभिः ॥ पृष्टः प्रोवाच सकलं पुराणं कौर्ममुत्तमं ॥ सन्निधौ देवदेवस्य तद्वक्ष्ये भवतामहं ॥ धन्यं यशस्य

4

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पापुण्यं पुराणं मोक्षप्रदं नृणां ॥ पुराणश्रवणं विप्राः कथनं च विशेषतः ॥ श्रुत्वा चाध्यायमेकं वै सर्वपापैः प्रमुच्यते ॥ उपाख्यान
मथैकं वा ब्रह्मलोके महीयते ॥ इदं पुराणं परमं कौर्म्मं कूर्मस्वरूपिणा ॥ उक्तं वै देवदेवेन श्रद्धातव्यं द्विजातिभिः ॥ ॥
इति श्रीकूर्मपुराणे इन्द्रद्युम्नमोक्षे प्रथमोध्यायः ॥ १ ॥ श्रीकूर्म उवाच ॥ शृणुध्वमृषयः सर्वे यत्पृष्टोहं जगद्धितं वक्ष्य
माणं मया सर्वं मिन्द्रद्युम्नाय भाषितं ॥ भूतैर्भव्यैर्भविष्यद्भिश्चरितैरुपबृंहितं ॥ पुराणं पुण्यदं नृणां मोक्षधर्मानुकीर्त्तनं
अहं नारायणो देवः पूर्वमासन्न मे परः ॥ उपास्य विपुलां निद्रां भोगिशय्यां समाश्रितः ॥ चिंतयामि पुनः सृष्टिं निशान्ते
प्रतिबुध्य तु ॥ ततो मे सहसोत्पन्नः प्रसादान्मुनिपुंगवाः ॥ चतुर्मुखस्ततो जातो ब्रह्मा लोकपितामहः ॥ तदंतरेभवत्क्रोधः
कस्माच्चित्कारणात्तदा ॥ आत्मनो मुनिशार्दूलास्तत्र देवो महेश्वरः ॥ रुद्रः क्रोधात्मको यहे शूलपाणिस्त्रिलोचनः ॥ ते
जसा सूर्यसंकाशस्त्रैलोक्यं संदहन्निव ॥ तदा श्रीरभवद्देवी कमलायतलोचना ॥ सुरूपा सौम्यवदना मोहिनी स
र्वदेहिनां ॥ शुचिस्मिता सुप्रसन्ना मंगला महिमास्पदा ॥ दिव्यकांतिसमायुक्ता दिव्यमाल्योपशोभिता ॥ नाराय
णी महामाया मूलप्रकृतिरव्यया ॥ स्वधाम्ना पूरयंतीदं मत्पार्श्वं समुपाविशत् ॥ तां दृष्ट्वा भगवान्ब्रह्मा मामुवाच
जगत्पतिं ॥ मोहायाशेषभूतानां सन्नियोगान्नियोजय ॥ येनेयं विपुला सृष्टिर्वर्द्धते मम माधव तथोक्तोहं श्रियं
देवीमब्रवीत्प्रहसन्निव । देवीदमखिलं विश्वं सदेवासुरमानुषं । मोहयित्वा ममादेशात्संसारे विनिपातय । ज्ञा
नयोगरतान्शांतान्धार्मिकान्वेदपारगान् ॥ विदवेदांगविज्ञानसंछिन्नशेषसंशयान् । महायज्ञपरान्विप्रान्द

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ कू॰पु॰ ॥ ततः परिवर्त्तयेत॥ ये यजन्ति जपैर्होमैर्देवदेवं महेश्वरं॥ स्वाध्यायेनेज्यया दानैस्तान् यत्नेन वर्जय॥ भक्तियोगसमायुक्तानीश्वरा
॥ ५ ॥ र्पितमानसान्॥ प्राणायामादिभिः शुद्धान् दूरात् परिहरामलान्॥ प्रणवासक्तमनसो रुद्रजप्यपरायणान्॥ अथर्वशि
रसो वेदन्धर्मज्ञान् परिवर्ज्जय॥ बहुनात्र किमुक्तेन स्वधर्मपरिपालकान्॥ ईश्वराराधनरतान्मन्नियोगान्न मोहय॥ एवं मया म
हामाया प्रेरिता हरिवल्लभा यथादेशं चकारासौ तस्माल्लक्ष्मीं समर्च्चयेत॥ श्रियं ददाति विपुलां पुष्टिं मेधां यशो बलं॥ अर्चि
ब ५ ता भगवत्पत्नी तस्माल्लक्ष्मीं समर्च्चयेत॥ ततोऽसृजत्स भगवान् ब्रह्मा लोकपितामहः॥ चराचराणि भूतानि यथापूर्वं ममा
ज्ञया॥ मरीचिभृग्वङ्गिरसं पुलस्त्यं पुलहं क्रतुं॥ दक्षमत्रिं वसिष्ठं च सोऽसृजद्योगविद्यया॥ नवैते ब्रह्मणः पुत्रा ब्रह्मणा
ब्राह्मणोत्तमः॥ ब्रह्मवादिन एवैते मरीच्याद्यास्तु साधकाः॥ ससर्ज ब्राह्मणान् वक्त्रात् क्षत्रियांश्च भुजाद्विभुः॥ वैश्या
नूरुद्वयाद्देवः पादाच्छूद्रान् पितामहः॥ यज्ञनिष्पत्तये ब्रह्मा शूद्रवर्ज्जं ससर्ज ह॥ गुप्तये सर्वदेवानां तेभ्यो यज्ञो हि निर्बभौ
ऋचो यजूंषि सामानि तथैवाथर्वणानि च॥ ब्रह्मणः सहजं रूपं नित्यैषा शक्तिरव्यया॥ अनादिनिधना दिव्या वागु
त्सृष्टा स्वयम्भुवा॥ आदौ वेदमयी भूता यतः सर्वाः प्रवृत्तयः॥ अतोऽन्यानि हि शास्त्राणि पृथिव्यां यानि कानिचित॥ न तेषु ॥ तापः ॥
रमते धीरः पाषण्डो जायते ततः॥ वेदार्थवित्तमैः कार्यं यत्स्मृतं मुनिभिः पुरा॥ स ज्ञेयः परमो धर्मो नान्यशास्त्रेषु संस्थि ॥ ५ ॥
तः॥ या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः॥ सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृताः॥ पूर्वकल्पे प्रजा
जाताः सर्वबाधाविवर्ज्जिताः॥ शुद्धान्तःकरणाः सर्वाः स्वधर्मपरिपालकाः॥ ततः कालवशात्तासां रागद्वेषादि

5

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

को भवेत् ।। अथ धर्मान् निशार्दूल: स्वधर्मप्रतिबंधक ।। ततः सा सततं सामिद्धिया सा मानी व जायते । रजोमात्रान्विका तासां
सिद्धयो यान्ति तथा भवेत् ।। मासु क्षीणासु त्वशेषासु कालयोगे ततः पुनः वर्णाश्रमं पापं मनष्ट्यकं हीनसिद्धिवकर्मजा ।। ततस्ता-
सां विप्रवंसाकर्माजीवनकल्पयत् ।। त्वा यं भवो मतः एवं धर्माश्रोता वा वर्णवंशकः । साक्षात् प्रजापते पूर्णिमि लक्ष्णा ब्रह्म-
णा द्विजा ।। एवा स्यालक्ष्यदनानन्तर्भूता धर्मा नष्याविरे-यजनं याजनं दानं ब्राह्मणस्य प्रतिग्रहः । अध्यापनं चाध्ययनं षट्-
कर्माणि द्विजोत्तमाः ।। दानमध्ययनं यज्ञो धर्मः क्षत्रियवैश्ययोः । दंडो युद्धं क्षत्रियस्य कृषि वैश्यस्य शस्यते ।। शुश्रूषैव
द्विजातीनां शूद्राणां धर्मसाधनं ।। कारुकर्म ततो वार्तिज्या क्रयविक्रयणां तथा ।। ततः स्थितेषु वर्णेषु स्थापयामास चा-
श्रमान् ।। गृहस्थं च वनस्थं च भिक्षुकं ब्रह्मचारिणं ।। अग्नयो ऽतिथिशुश्रूषा यज्ञो दानं सुरार्चनं । गृहस्थस्य समासेन
धर्मोऽयं मुनिपुंगवाः ।। होमो मूलफलाशित्वं स्वाध्यायस्तप एव च । संविभागो यथान्यायं धर्मोऽयं वनवासिनः ।। भैक्षा-
ऽशनं च मौनित्वं योगध्यानं विशेषतः सम्यक् ज्ञानं च वैराग्यं धर्मोऽयं भिक्षुके मतः ।। भिक्षाचर्या च शुश्रूषा गुरोः
स्वाध्याय एव च ।। संध्याकर्माग्निकार्यं च धर्मोऽयं ब्रह्मचारिणां ।। ब्रह्मचारिवनस्थानां भिक्षुकाणां द्विजोत्तमाः ।।
साधारणं ब्रह्मचर्यं प्रोवाच कमलोद्भवः ।। ऋतुकालाभिगामित्वं स्वदारेषु न चान्यतः । पर्ववर्जं गृहस्थस्य ब्रह्मचर्य-
मुदाहृतं ।। आगर्भधारणाज्ञाज्ञा कार्यं तेन प्रमादतः ।। अकुर्वाणास्तु विप्रेन्द्रा भ्रूणहा तु प्रजायते ।। वेदाभ्यासो ऽन्व-
हं शक्त्या श्राद्धं चातिथिपूजनं । गृहस्थस्यापरो धर्मो देवताभ्यर्चनं तथा । वैवाह्यमग्निमिंधीत सायं प्रातर्यथा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विधि ॥ देशांतरगतेनाप्यस्तनपलीकरणं च । तयातामाश्रयाराणां गृहस्थोपोनिनन्यते । अन्येनमुपजीविंति तस्माच्छ्रेया
न्गृहाश्रमी । एकाश्रमं गृहस्थस्य चतुर्णां श्रुतिदर्शनात् । तस्माद्गार्हस्थ्यमेवैकं विज्ञेयं धर्मसाधनं । परित्यजेदर्थका
मौ यौ स्यातां धर्मवर्जितौ । सर्वलोकविरुद्धं च धर्ममप्याचरेन्न तु । धर्मात्संजायते ह्यर्थो धर्मात्कामोभिजायते धर्मए
वापवर्गाय तस्मात्कर्म समाश्रयेत । तस्मिन्स्वधर्मसमायुक्तौ ह्यर्थकामौ व्यवस्थितौ । इहलोके सुखी भूत्वा प्रेत्यानंत्याय
कल्पते । धर्मात्संजायते मोक्षो ह्यर्थात्कामोभिजायते ॥ एवं साधनसाध्यत्वं चातुर्विध्यं प्रदर्शितं ॥ य एवं वेद धर्मार्थ
काममोक्षस्य मानवः । मत्यान्यं चानुतिष्ठेत स चानंत्याय कल्पते ॥ तस्मादर्थं च कामं च त्यक्त्वा धर्मं समाश्रयेत ॥ ध
र्मात्संजायते सर्वमित्याहुर्ब्रह्मवादिनः ॥ धर्मेणाधार्यते सर्वं जगत्स्थावरजंगमं ॥ अनादिनिधनाशक्तिः सैषा ब्राह्मी
द्विजोत्तमाः ॥ कर्मणा प्राप्यते धर्मो ज्ञानेन च न संशयः ॥ तस्माज्ज्ञानेन सहितं कर्मयोगं समाचरेत ॥ प्रवृत्तं च निवृत्तं च
द्विविधं कर्म वैदिकं ज्ञानपूर्वं निवृत्तं स्यात्प्रवृत्तं यदतोन्यथा ॥ निवृत्तं सेवमानस्तु याति तत्परमं पदं । तस्मान्निवृत्तं
संसेव्यमन्यथा संसरेत्पुनः ॥ क्षमा दमो दया दानमलोभस्त्याग एव च । आर्जवं चानसूया च तीर्थानुसरणं तथा स ॥ रामः ॥
त्यं संतोषमास्तिक्यं श्रद्धा चेंद्रियनिग्रहः ॥ देवताभ्यर्चनं पूजा ब्राह्मणानां विशेषतः । अहिंसा प्रियवादित्वमपै ॥ ९ ॥
शून्यमकल्कता । सामासिकमिमं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः । प्राजापत्यं ब्राह्मणानां स्मृतं स्थानं क्रियावतां । स्थानमैंद्रं
क्षत्रियाणां संग्रामेष्वपलायिनां । वैश्यानां मारुतं स्थानं स्वधर्ममनुवर्त्ततां । गांधर्वं शूद्रजातीनां परिचारेण वर्त्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नां॥ब्रह्मासीन्निसर्गस्त्वाराणामृषीणामूर्द्ध्वरेतसां॥स्थानं नैष्ठानुपस्थानं स्मृतं दैवलोकसां॥प्रजापत्यं गृहस्थानां स्थानमुक्तं
स्वयंभुव॥यतीनां जितचित्तानां न्यासिनामूर्द्ध्वरेतसां॥हैरण्यगर्भं तत्स्थानं यस्मान्नावर्त्तते पुनः॥योगिनाममृतं स्थानं
व्योमाख्यं परमाक्षरं॥आनन्दमैश्वरं - म याकाष्टा स्मपराऊतिः॥मषय ऊचुः॥भगवन्नाऽरिघ्नहिरण्याक्ष निसूदन
चत्वारो ह्याश्रमा प्रोक्ता योगिनामेक उच्यते॥श्रीकूर्मो वाच॥सर्वकर्माणि संन्यस्य समाधिमचलं श्रितः॥यत्रास्ते निश्च
लो योगी स संन्यासी नपंचम॥सर्वेषां माश्रमाणां द्वैविध्यश्रुतिदर्शनं॥ब्रह्मचार्युपकुर्वाणो नैष्ठिको ब्रह्मतत्परः
यो धीत्य विधिवद्वेदान्गृहस्थाश्रममाव्रजेत॥उपकुर्वाणको ज्ञेयो नैष्ठिको मरणान्तिकः॥उदासीनः साधकश्च गृह
स्थो द्विविधो भवेत॥कुटुंबभरणायत्तः साधके॥सौ गृही भवेत॥ऋणानि त्रीण्यपाकृत्य त्यक्त्वा भार्याधनादिकं।एका
कीयस्तु विचरेदुदासीनः समौष्टिकः॥तपस्तप्यति योरण्ये यजेद्देवाञ्जुहोति वा॥स्वाध्याये चैव निरतो वनस्थस्तापसो म
तः॥तपसा कर्षितोत्यर्थं यस्तु ध्यानपरो भवेत॥सान्यासिकः स विज्ञेयो वानप्रस्थाश्रमे स्थितः॥योगाभ्यासरतो नित्य
मारुरुक्षुर्जितेन्द्रियः।ज्ञानाय वर्त्तते भिक्षुः प्रोच्यते पारमेष्ठिक॥यस्त्वात्मरतिरेव स्यान्नित्यतृप्तो महामुनिः। सम्यक् द
र्शनसंपन्नः स योगी भिक्षुरुच्यते॥ज्ञानसंन्यासिनः केचिद्वेदसंन्यासिनोपरे॥कर्मसंन्यासिनः केचित्त्रिविधाः परमे
ष्ठिका॥योगी च त्रिविधो ज्ञेयो भौतिकः सांख्य एव च॥तृतीयो त्याश्रमी प्रोक्ता योगमुत्तममास्थितः॥प्रथमा भावना
पूर्वे सांख्ये त्वक्षरभावन॥त्रितियो त्याश्रमी प्रोक्ता योगमुत्तममास्थितः प्रथमा भावनापूर्वे सांख्ये त्वक्षरभावन

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञिं नियेवं निमा प्रोक्ता भावना परमेश्वरी ॥ तस्मादेनं विजानीयं आश्रमाणां वनुरूपं । सर्वेषु वेदशास्त्रेषु पंचमो नोपपद्यते ।
एवं वर्णाश्रमान् सृष्ट्वा देवदेवो निरंजनः ॥ दक्षादीन् प्राह विश्वात्मा सृजध्वं विविधाः प्रजाः ॥ ब्रह्मणो वचनात्पुत्रा दक्षाद्या
मुनिसत्तमाः ॥ असृजन्त प्रजाः सर्वे देवमानुषपूर्विकाः ॥ इत्येवं भगवान् ब्रह्मा स्रष्टृत्वे संव्यवस्थितः ॥ अहं वै पालयामीदं
संहरिष्यति शूलभृत् ॥ तिस्रस्तु मूर्तयः प्रोक्ता ब्रह्मविष्णुमहेश्वराः । रजःसत्त्वतमोयोगात्परस्य परमात्मनः ॥ अन्योन्य
मनुरक्ता ह्यन्योन्यमुपजीविनः ॥ अन्योन्यप्रणताश्चैव लीलया परमेश्वराः ॥ ब्राह्मी माहेश्वरी चैव तथैवाक्षरभावना ॥ अ
हं वै व महादेवो न भिन्नो परमार्थतः ॥ विभज्य स्वेच्छयात्मानं सोऽन्तर्यामीश्वरः स्थितः ॥ त्रैलोक्यमखिलं स्रष्टुं सदेवासुरमानुष
पुरुषः ॥ पुरुषो ऽव्यक्तो ब्रह्मन्त्वमनुपागतः ॥ तस्माद् ब्रह्मा महादेवो विष्णुर्विश्वेश्वरः परः ॥ एकस्यैव स्मृतास्तिस्रस्तन्वः कार्य
वशात्प्रभोः ॥ तस्मात्सर्वं प्रयत्नेन वंद्याः पूज्या विशेषतः ॥ यदिच्छेदचिरात्स्थानं यत्तन्मोक्षाख्यमव्ययं ॥ वर्णाश्रमप्रयुक्ते
न धर्मेण प्रीतिसंयुतः ॥ पूजयेद्भावयुक्तेन यावज्जीवं प्रतिज्ञया ॥ चतुर्णामाश्रमाणां तु प्रोक्तो यं विधिवद् द्विजाः । आश्रमो
वैष्णवो ब्राह्मो हराश्रम इति त्रयः । तल्लिंगधारी नियतं तद्भक्तजनवत्सलः ॥ ध्यायेदथार्चयेदेतान् ब्रह्मविद्यापरायणाः
सर्वेषामेव भक्तानां शंभोर्लिंगमनुत्तमं ॥ सितेन भस्मना कार्यं ललाटे त्रिपुण्ड्रकं ॥ यस्तु नारायणं देवं प्रपन्नः परमं
पदं ॥ धारयेत्सर्वदा शूलं ललाटे गंधवारिभिः ॥ प्रपन्ना ये जगद्बीजं ब्रह्माणं परमेष्ठिनं ॥ तेषां ललाटे तिलकं धारणीयं तु स
र्वदा यो सावनादिर्भूतादिः कालात्मासौ धृतो भवेत् उपर्यधो भावयोगात्त्रिपुंड्रस्य तु धारणात् ॥ यत्तत्प्रधानं त्रिगु

॥ ल्पः ॥
॥ ८ ॥

7

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

णां ब्रह्मविद्विशिवात्मकम् । धृतं तु भलधारणाऽव मेव न संशयः ॥ ब्रह्मन्येतो मय्येकं पदे तं चऽलंरवे ॥ भव मेव ध्रुवं स्थानं
मेश्वरे मिलकेक्रमे ॥ तस्मात्कार्यं त्रिभूलोकेनथावनिलकं शुभं ॥ स्वाध्यायं वा पिपुकानां तपाणां विधिपूर्वकं ॥ यज्ञेन तु गुरुत्या
दक्षौ जपेद्दयाजितेन्द्रिय ॥ शान्तो दान्तो जितक्रोधो वर्णाश्रमविधानवित् ॥ स्वर्वपरित्वदेदेवान्यावृत्तिं वंसमाहित ॥ तेषां त्व
स्थानमचलं सो विरादधिगच्छति ॥ ॥ इति श्रीकूर्मपुराणे वर्णाश्रमवर्णनं नाम द्वितीयोध्याय ॥ ॥ अथ ध्याय ३ ॥
वर्णाभगवतो दिष्टाश्चत्वारो वाश्रमास्तथा ॥ इदानीं क्रममस्माकमाश्रमाणां वद प्रभो ॥ कूर्म उवाच ॥ ब्रह्मचारी गृहस्था
श्च वानप्रस्थो यतिस्तथा ॥ क्रमेणैवाश्रमाः प्रोक्ताः कारणादन्यथा भवेत् ॥ उत्पन्नज्ञानविज्ञानो वैराग्यं परमं गतः ॥ प्रव्रजे
द्ब्रह्मचर्यात्तु यदीच्छेत्परमां गतिं ॥ दारानाहृत्य विधिवदन्यथा विविधैर्मखैः ॥ यजेदुत्पादयेत्पुत्रान्विरक्तो यदि संन्य
सेत् ॥ अनिष्ट्वा विधिवद्यज्ञैरनुत्पाद्य तथात्मजान् ॥ न गार्हस्थ्यं गृही त्यक्त्वा संन्यसेद्बुद्धिमान्द्विजः ॥ अथ वैराग्यवेगेन स्था
तुं नोत्सहते गृहे तत्रैव संन्यसेद्विद्वाननिष्ट्वापि द्विजोत्तमः ॥ अन्यथा विविधैर्यज्ञैरिष्ट्वा वनमथाश्रयेत् ॥ तपस्तप्त्वा तपो
योगाद्विरक्तः संन्यसेद्यदि ॥ वानप्रस्थाश्रमं गत्वा न गृहं प्रविशेत्पुनः ॥ न संन्यासी वनं चाथ ब्रह्मचर्यं न साधकः ॥ प्राजा
पत्यां नितपेविङ्गिमाग्नेयीमथवा द्विजः ॥ प्रव्रजेत्तु गृही विद्वान्वनाद्वा श्रुतिचोदनात् ॥ प्रकर्तुमसमर्थोपि जुहोति
यजतिक्रियाः ॥ अन्धः पंगुर्दरिद्रो वा विरक्तः संन्यसेद्द्विजः ॥ सर्वेषामेव वैराग्यं संन्यासे तु विधीयते ॥ पतत्येवावि

॥ कू: ॥ ण्यो वा संन्यासं कर्त्तुमिच्छति । एकस्मिन्नथवा सम्यग्वर्त्तेतामरणांतिकं । श्रद्धावानाश्रमेषूक्तः सोऽमृतत्वाय कल्पते ॥ ब्रह्मण्या
॥ ८ ॥ धाय कर्माणि निःसंगः कामवर्जितः । प्रसन्नेनैव मनसा कुर्वाणो याति तत्पदं । ब्रह्मणो दीयते देयं ब्रह्मणो संप्रदीयते । ब्रह्मै
व दीयते चेति ब्रह्मार्पणमिदं परं ॥ नाहं कर्त्ता सर्वमेतत् ब्रह्मैव कुरुते तथा । एतद्ब्रह्मार्पणं प्रोक्तमृषिभिस्तत्त्वदर्शिभिः
प्रीणातु भगवानीशः कर्मणानेन शाश्वतः । करोति सततं बुद्ध्या ब्रह्मार्पणमिदं परं ॥ यद्वा फलानां संन्यासं प्रकुर्यात्पर
मेश्वरे ॥ कर्मणामेतदप्याहुर्ब्रह्मार्पणमनुत्तमं ॥ कार्यमित्येव यत्कर्म नियतं संगवर्जितः ॥ क्रियते विदुषा कर्म तद्भवेदपि
मोक्षदं । अथवा यदि कर्माणि कुर्यान्नित्यान्यपि द्विजः ॥ अकृत्वा फलसंन्यासं बध्यते तत्फलेन तु । तस्मात्सर्वप्रयत्नेन
त्यक्त्वा कर्माश्रितं फलं । अविद्वानपि कुर्वीत कर्माप्नोति चिरात्पदं ॥ कर्मणा क्षीयते पापमैहिकं पौर्विकं तथा । मनः
प्रसादश्च ततो ब्रह्म विज्ञायते नरः । कर्मणा सहितात् ज्ञानात्सम्यग्योगोऽभिजायते । ज्ञानं च कर्मसहितं जायते दोष
वर्जितं । तस्मात्सर्वप्रयत्नेन यत्र तत्राश्रमे रतः ॥ कर्माणीश्वरतुष्ट्यर्थं कुर्यान्नैष्कर्म्यमाप्नुयात् ॥ संप्राप्य परमं ज्ञानं ॥ राम: ॥
नैष्कर्म्यं तत्प्रसादतः । एकाकी निर्ममः शान्तो जीवन्नेव विमुच्यते ॥ वीक्षते परमात्मानं परं ब्रह्म महेश्वरं ॥ नित्यानंद ॥ ८ ॥
निराभासस्तस्मिन्नेव लयं व्रजेत् ॥ तस्मात्सेवेत सततं कर्मयोगं प्रसन्नधीः । तृप्तये परमेशस्य तत्पदं याति शा
श्वतं । एतद्वः कथितं सर्वं चातुराश्रम्यमुत्तमं ॥ न ह्येतत्समतिक्रम्य सिद्धिं विंदति मानवः ॥ ॥ इति श्रीकूर्म
पुराणे चातुराश्रम्यकथनं नाम त्रिंशोऽध्यायः ॥ ॥ सूत उवाच ॥ अथाश्रमविधिं कृत्स्नं क्रमशो हरिद्वै

सः॥ नमस्कृत्य हृषीकेशं पुनर्वचनमब्रुवन्॥ मुनय ऊचुः॥ भाषितं भवता सर्वं वातृगाथ्यप्युपक्रमं॥ इदानीं श्रोतुमिच्छामो यथा
संभवते जगत॥ कुतः सर्वमिदं जातं कस्मिंश्च लयमेष्यति॥ नियंता कश्च सर्वेषां वदस्व पुरुषोत्तम॥ श्रुत्वा नारायणो वा
क्यमृषीणां कूर्मरूपधृक॥ प्राह गंभीरया वाचा भूतानां प्रभवोऽव्यय॥ कूर्म उवाच॥ महेश्वरः परोऽव्यक्तश्चतुर्व्यूहः सनात
नः॥ अनंतश्चाप्रमेयश्च नियंता विश्वतोमुखः॥ अव्यक्तं कारणं यत्तन्नित्यं सदसदात्मकं॥ प्रधानं प्रकृतिश्चेति यदाहुस्त
त्वचिंतकाः॥ गंधवर्णरसैर्हीनं शब्दस्पर्शविवर्जितं॥ अजरं ध्रुवमक्षय्यं नित्यं स्वात्मन्यवस्थितं॥ जगद्योनिर्महाभूतं परं ब्र
ह्मसनातनं॥ विग्रहः सर्वभूतानामात्मनाधिष्ठितं महत्॥ अनाद्यंतमजं सूक्ष्मं त्रिगुणं प्रभवाव्ययं॥ असांप्रतमविज्ञेयं ब्र
ह्माग्रे समवर्तत॥ गुणसाम्ये तदा तस्मिन् पुरुषे चात्मनि स्थिते॥ प्राकृतः प्रलयो ज्ञेयो यावद्विश्वसमुद्भव॥ ब्राह्मी रात्रिरि
यं प्रोक्ता अहः सृष्टिरुदाहृता॥ अहर्न विद्यते तस्य न रात्रिर्ह्युपचारतः॥ निशांते प्रतिबुद्धोऽसौ जगदादिरनादिमान॥ सर्वभू
तमयोऽव्यक्तादंतर्यामीश्वरः परः॥ प्रकृतिं पुरुषं चैव प्रविश्याशु महेश्वरः॥ क्षोभयामास योगेन परेण परमेश्वरः॥
यथा मदो नरस्त्रीणां यथा वा माधवोऽनिलः॥ अनुप्रविष्टः क्षोभाय तथासौ योगमूर्तिमान्॥ स एव क्षोभको विप्राः क्षोभ्य
श्च परमेश्वरः॥ संकोचविकाशाभ्यां प्रधानत्वे व्यवस्थितः॥ प्रधानात्क्षोभ्यमाणाच्च तथा पुंसः पुरातनात॥ प्रादुरासीन्मह
द्बीजं प्रधानपुरुषात्मकं॥ महानात्मा मतिर्ब्रह्मा प्रबुद्धिः ख्यातिरीश्वरः॥ प्रज्ञा धृतिः स्मृतिः संविदेतस्मादिति तत्स्मृतं॥ वै
कारिकस्तैजसश्च भूतादिश्चैव तामसः॥ त्रिविधोऽयमहंकारो महतः संबभूव ह॥ अहंकारोऽभिमानश्च कर्त्ता मंता च स स्मृतः॥

॥ कूर्म ॥
॥ ९ ॥

ग्रात्मा च मुजलोजीवो यतः सर्वाप्रकृतमयः पंचभूतात्यहंकारो तन्मात्राणि च जज्ञिरे ॥ इंद्रियाणि च सर्वाणि सर्वं तस्यात्मकं जगत्
मनस्त्वव्यक्तजं प्रोक्तं विकारः प्रथमः स्मृतः । एतस्माज्जायते कर्त्ता भूतादिश्चाप्यनुपश्यति । वैकारिकादहंकारात्सर्गो वैकारिको
भवेत् । तैजसानींद्रियाणि स्युर्देवाभूतादिस्तु विकुर्वाणाः शब्दमात्रं ससर्ज ह । आकाशस्य घनं तस्मात्तस्य शब्दं गुणं विदुः ॥ वायुश्चापि
विकुर्वाणो रूपमात्रं ससर्ज ह ॥ ज्योतिरुत्पद्यते वायोस्तद्रूपं गुणमुच्यते । ज्योतिश्चापि विकुर्वाणं रसमात्रं ससर्ज ह ॥ संभवंति
ततोंभांसि रसाधाराणि तानि च ॥ आपश्चापि विकुर्वंत्यो गंधमात्रं ससर्जिरे ॥ संघातो जायते तस्मात्तस्य गंधो गुणो मतः
आकाशं शब्दमात्रं तु स्पर्शमात्रं समावृणोत् ॥ द्विगुणास्तत्र वायुः शब्दस्पर्शात्मकोभवत् ॥ रूपं तथैवाविशतः शब्दस्प
र्शौ गुणावुभौ ॥ त्रिगुणाः स्यात्ततो वह्निः सशब्दस्पर्शरूपवान् । शब्दस्पर्शश्च रूपं च रसमात्रं समाविशत् ॥ तस्माच्चतुर्गुणा
आपो विज्ञेयास्तु रसात्मिकाः । शब्दस्पर्शश्च रूपं च रसो गंधं समाविशत् ॥ तस्मात्पंचगुणा भूमिः स्थूला भूतेषु शब्द्य
ते ॥ शांता घोराश्च मूढाश्च विशेषास्तेन ते स्मृताः ॥ परस्परं तु प्रविशा धारयंति परस्परं । एते सप्त महात्मानो ह्यन्योन्यस्य सम
माश्रयात् ॥ नाशक्नुवन् प्रजा स्रष्टुमसमागम्य कृत्स्नशः । पुरुषाधिष्ठितत्वाच्च अव्यक्तानुग्रहेण च ॥ महदाद्या विशे
षां ॥ ताह्यंडमुत्पादयंते एककालसमुत्पन्नं जलबुद्बुदवद्वृतं ॥ विशेषेभ्योंडमभवद्बृहत्तदुदकेशयं ॥ कार्यस्य कार
णं तस्मिन् संसिद्धं परमेष्ठिनः । प्राकृतेंडे विवृद्धे तु क्षेत्रज्ञो ब्रह्मसंज्ञितः । स वै शरीरी प्रथमः स वै पुरुष उच्यते ॥ आ
दिकर्त्ता स भूतानां ब्रह्माग्रे समवर्त्तत । यमाहुः पुरुषं हंसं प्रधानात्परतः स्थितं । हिरण्यगर्भं कपिलं छंदोमूर्त्तिं स

वैकारिको भवेत् । तैजसानींद्रियाणि स्युर्देवा वैकारिका दश । एकाद
शं मनस्तत्र स्वगुणेनोभयात्मकं । भूततन्मात्रसर्गोयं भूतादेरभवद्द्विजाः

॥ रामः ॥
॥ ९ ॥

नातत्त्वं ॥ मेरुरुल्वमभूत्तस्य जरायुश्चापि पर्वताः। गर्भोदकं समुद्राश्च तस्यासन् परमात्मनः। तस्मिन्नण्डेऽभवद्विश्वं सदेवासुरमा-
नुषं ॥ चन्द्रादित्यौ सनक्षत्रौ सग्रहौ सह वायुना। अद्भिर्दशगुणाभिश्च बाह्यतोऽण्डं समावृतं ॥ आपो दशगुणेनैव तेजसा बाह्यतो
वृताः। तेजो दशगुणेनैव बाह्यतो वायुनावृतं। आकाशेनावृतो वायुः खं च भूतादिना वृतं। भूतादिर्महता तद्वदव्यक्तेनावृतो
महान् ॥ एते लोका महात्मानः सर्वतत्त्वाभिमानिनः। वसन्ति तत्र पुरुषा आत्मानो व्यवस्थिताः ॥ ईश्वरा योगधर्माणो ये
चान्ये तत्त्वचिन्तकाः। सर्वज्ञाः शान्तरजसो नित्यं मुदितमानसाः ॥ एतैरावरणैरण्डं सप्तभिः प्राकृतैर्वृतं ॥ एतावच्छक्यते वक्तुं
मायैषा गहना द्विजाः ॥ एतत्प्राधानिकं कार्यं यन्मया बीजमीरितं। प्रजापतेरियं मूर्तिरितीयं वैदिकी श्रुतिः ॥ ब्रह्माण्डमे-
तत्सकलं सप्तलोकबलान्वितं। द्वितीयं तस्य देवस्य शरीरं परमेष्ठिनः ॥ हिरण्यगर्भो भगवान् ब्रह्मा वै कनकाण्डजः।
तृतीयं भगवद्रूपं प्राहुर्वेदार्थवेदिनः ॥ रजोगुणमयं चान्यद्रूपं तस्यैव धीमतः। चतुर्मुखः स भगवान् जगत्सृष्टौ प्र-
वर्तते ॥ सृष्टं च पाति सकलं विश्वात्मा विश्वतोमुखः। सत्त्वं गुणमुपाश्रित्य विष्णुर्विश्वेश्वरः स्वयं ॥ अन्तकाले स्वयं
देवः सर्वात्मा परमेश्वरः ॥ तमोगुणं समाश्रित्य रुद्रः संहरते जगत्। एकोऽपि सन्महादेवस्त्रिधासौ समवस्थितः।
सर्गरक्षालयगुणैर्निर्गुणोऽपि निरंजनः ॥ एकधा स द्विधा चैव त्रिधा च बहुधा गुणैः। योगेश्वरः शरीराणि करोति विकरोति च
नानाकृतिक्रियारूपनामवन्ति स्वलीलया ॥ हिताय चैव भक्तानां स एव ग्रसते पुनः ॥ त्रिधा विभज्य चात्मानं त्रैलो-
क्ये संप्रवर्तते। सृजते ग्रसते चैव वीक्षते च विशेषतः। यस्मात्सृष्ट्वानुगृह्णाति ग्रसते च पुनः प्रजाः। गुणात्मकत्वात्त्रै-

॥कूर्म॥ कल्पेतस्मादेकःसउच्यते ॥ अग्रेहिरण्यगर्भःसप्रादुर्भूतःसनातनः ॥ आदित्याश्चादिदेवोसौअजातत्वादजःस्मृतः ॥ बृहत्वाद्ब्रह्म
॥१०॥ णोब्रह्मायदेवानांपरमेश्वरः ॥ वशित्वादप्यवश्यत्वादीश्वरःपरिभाषितः ॥ ऋषिःसर्वत्रगत्वेनहरिःसर्वगुरुर्यतः ॥ शिवःस्वत्रिम
लोयास्माद्विभुःसर्वापनोपतः ॥ नारायणास्सर्वैःतोनानारकः ॥ परिगीयते ॥ हेतुनात्वाकिमुक्तेनसर्वंब्रह्ममयंजगत् ॥ अनेक
भेदभिन्नक्रीडतेपरमेश्वरः ॥ इत्येषप्रकृतःसर्गःसंक्षेपात्कथितोमया ॥ अबुद्धिपूर्वकोविप्राब्राह्मीमूर्तिंनिबोधत ॥
इतिश्रीकूर्मपुराणेप्राकृतसर्गनामचतुर्थोध्यायः ॥४॥ कूर्मउवाच ॥ स्वयंभुवोनिवृत्तस्यकालसंख्याद्विजोत्तमाः ॥ अनुप्र
दानुपूर्वंत्वांस्वयंभूरितिसस्मृतः ॥ नारायणमनयोयस्मादेतेननारायणःस्मृतः ॥ हरःसंसारहरणाद्विभुत्वाद्विष्णुरुच्यते
भगवान्सर्वविज्ञानादवनादोमितिस्मृतः ॥ सर्वज्ञःसर्वविज्ञानात्सर्वंसर्वमयोयतः ॥ नशक्यतेसमाख्यातुंबहुवर्षैरपि
स्वयं ॥ कालसंख्यासमासेनपरार्द्धद्वयकल्पिता ॥ सएवस्यात्परःकालःतदन्तेप्रतिसृज्यते ॥ निजेनतस्यमानेनआयुव
र्षशतंस्मृतं तत्पराख्यंतदर्द्धंवापरार्द्धमभिधीयते ॥ काष्ठापंचदशाख्यातानिमेषाद्विजसत्तमाः ॥ काष्ठात्रिंशत्कलात्रिं
शत्कलामौहूर्तिकीगतिः ॥ तावत्संख्यैरहोरात्रंमुहूर्तैर्मानुषंस्मृतं ॥ अहोरात्राणितावंतिमासःपक्षद्वयात्मकः ॥ ॥राम॥
तैःषड्भिरयनंवर्षंद्वेयनेदक्षिणोत्तरे ॥ अयनंदक्षिणंरात्रिर्देवानामुत्तरंदिनं ॥ दिव्यैर्वर्षसहस्रैस्तुकृतत्रेतादिसंज्ञितं चतुर्यु ॥१०॥
गंद्वादशभिस्तद्विभागंनिबोधतः ॥ चत्वार्याहुःसहस्राणिवर्षाणांतुकृतंयुगं ॥ तस्यतावच्छतीसंध्यासंध्यांशश्चकृत
स्यतु ॥ त्रिशतीद्विशतीसंध्यातथाचैकशतंक्रमात ॥ अंशकंषट्शतंतस्मात्कृतसंध्यांशकंविना ॥ त्रेताद्वापरतिष्याणां

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विनासंख्याज्ञकेन तु प्रोक्ताद्य परनिस्मायं कालस्ताने प्रकीर्त्तितं ॥ एतद्वादशसाहस्रं साधिकं परिकीर्त्तितं ॥ तदेकसप्ततिगुणं
मनोरन्तरमुच्यते ॥ ब्रह्मणो दिवसे विप्रा मनवस्तु चतुर्द्दश ॥ स्वायंभुवादयः सर्वे तेनः सर्वाणकादयः ॥ तैरियं पृथिवी सर्वा
सप्तद्वीपा सपर्वता पूर्णं युगसहस्रं वै परिकल्प्या नरेश्वरैः ॥ मन्वंतरेण चैकेन सर्वाण्येवांतराणि वै ॥ व्याख्यातानि न संदे
हः कल्पं कल्पेन चैव हि ॥ ब्राह्ममेकमहः कल्पस्तावती रात्रिरिष्यते ॥ चतुर्युगसहस्रं तु कल्पमाहुर्मनीषिणः ॥ त्रीणि क
ल्पः शतानि स्युस्तथा षष्टिर्द्विजोत्तमाः ॥ ब्रह्मणो वत्सरस्तेन कथितो वै द्विजोत्तमाः ॥ स च कालः ज्ञानगुणाः परं चैव तन
द्विः तस्यांते सर्वतत्वानां स्वहेतौ प्रकृतौ लयः ॥ तेनायं प्रोच्यते सद्भिः प्रकृतः प्रतिसंचरः ॥ ब्रह्मनारायणेशानां त्रयपा
णां प्रकृतौ लयः प्रोच्यते कालयोगेन पुनरेव च संभव ॥ एवं ब्रह्मा च भूतानि वासुदेवोपि शंकरः ॥ कालेनैव तु सृज्यन्ते स
एव ग्रसते पुनः ॥ अनादिरेष भगवान् कालोनंतोजरोमरः ॥ सर्वगत्वात्स्वतंत्रत्वात्सर्वात्मत्वान्महेश्वरः ॥ ब्रह्माणो बह
वो रुद्रा ह्यन्ये नारायणादयः ॥ एको हि भगवानीशः कालकविरितिश्रुतिः ॥ एकमत्र व्यतीतं तु परार्द्धं ब्रह्मणो द्विजः सां
प्रतं वर्त्तते त्वर्द्धं तस्य कल्पोयमग्रजः ॥ योतीतः सांप्रतिमः कल्पः पद्म इत्युच्यते बुधैः ॥ वाराहो वर्त्तते कल्पस्तस्य वक्ष्यामि
विस्तरं ॥ ॥ इति श्रीकूर्म्मपुराणे कालसंख्याकथनं पंचमोध्यायः ॥ ॥ कूर्म उवाच ॥ आसीदेकार्णवं घोरमवि
भागं तमोमयं ॥ शांतवातादिकं सर्वं न प्रज्ञायत किंचन ॥ एकार्णवे तदा तस्मिन्नष्टे स्थावरजंगमे ॥ तदा समभवद्ब्र
ह्मा सहस्राक्षः सहस्रपात ॥ सहस्रशीर्षा पुरुषो रुक्मवर्णो ह्यतीन्द्रियः ॥ ब्रह्मा नारायणाख्यस्तु सुष्वाप सलिले तदा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ कूर्मपु ॥ रमं चोपगः स्वयं शोकं नारायणं प्रति ॥ ब्रह्मस्वरूपिणं देवं जगतः प्रभवाव्ययं ॥ आपो नारा इति प्रोक्ता नाम्ना पूर्वमिति श्रु-
॥ ११ ॥ तिः ॥ अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः ॥ तुल्यं युगसहस्रस्य नैशं कालमुपास्य सः ॥ शर्वर्यन्ते प्रकुरुते ब्रह्मत्वं सर्ग-
कारणात् ॥ ततस्तु सलिले तस्मिन् विज्ञायांतर्गतां महीं ॥ अनुमानात्तदुद्धारं कर्तुकामः प्रजापतिः ॥ जलक्रीडासु रुचिरं वा-
राहरूपमास्थितः ॥ अधृष्यं मनसाप्यन्यैर्वाङ्मयं ब्रह्मसंज्ञितं ॥ पृथिव्युद्धरणार्थाय प्रविश्य च रसातलं ॥ दंष्ट्रयाभ्यु-
ज्जहारैनामात्माधारो धराधरः ॥ दृष्ट्वा दंष्ट्राग्रविन्यस्तां पृथ्वीं प्रथितपौरुषं ॥ अस्तुवंजनलोकस्थाः सिद्धा ब्रह्मर्षयो हरि-
मषयदुत्तः ॥ नमस्ते देवदेवाय ब्रह्मणे परमेष्ठिने ॥ पुरुषाय पुराणाय शाश्वताय जयाय च ॥ नमः स्वयंभुवे तुभ्यं स्रष्ट्रे सर्वार्थ-
वादिने ॥ नमो हिरण्यगर्भाय वेधसे परमात्मने ॥ नमस्ते वासुदेवाय विष्णवे विश्वयोनये ॥ नारायणाय देवानां हितका-
रिणे ॥ नमोस्तु ते चतुर्वक्त्र शार्ङ्गचक्रासिधारिणे ॥ सर्वभूतात्मभूताय कूटस्थाय नमो नमः ॥ नमो वेदरहस्याय न-
मस्ते वेदयोनये ॥ नमो बुद्धाय शुद्धाय नमस्ते ज्ञानरूपिणे ॥ नमोस्त्वानंदरूपाय साक्षिणे जगतां नमः ॥ अनंतायाप्र-
मेयाय कार्याय करणाय च ॥ नमस्ते पंचभूताय पंचभूतात्मने नमः ॥ नमो मूलप्रकृतये मायारूपात्मने नमः ॥ रामः ॥
नमोस्तु ते वराहाय नमस्ते मत्स्यरूपिणे ॥ नमो योगाधिगम्याय नमः संकर्षणाय ते ॥ नमस्त्रिमूर्तये तुभ्यं त्रिधा- ॥ ११ ॥
म्ने दिव्यतेजसे ॥ नमः सिद्धाय पूज्याय गुणत्रयविभागिने ॥ नमोस्त्वादित्यवर्णाय नमस्ते पद्मयोनये ॥ नमो-
मूर्ताय शांताय माधवाय नमो नमः ॥ त्वयैव सृष्टमखिलं त्वय्येव सकलं स्थितं ॥ पालयैतज्जगत्सर्वं त्राता त्वं न

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शरण्यां गतिः ॥ ब्रह्मण्यं स भगवान्निरुक्तनं कादेरभिहन्ते ॥ प्रसादमकरोत्तेषां वराहवपुरीश्वरः ॥ ततः संस्थापयामास पृथिवीं पृथि-
वीधरः ॥ मुमोच रूपं मनसा धारयित्वा धराधरः ॥ तस्योपरि जलौघस्य महती नौरिव स्थिता ॥ विततत्वाद्देहस्य न मही
याति संप्लवं पृथिवीं स समां कृत्वा पृथिव्यां सोचिनोद्गिरीन् प्राक्सर्गदग्धानखिलान् ततः सर्गे दधन्मनः ॥ ॥ इ
ति श्रीकूर्मपुराणे पृथिव्युद्धारे षष्ठोऽध्यायः ॥ ६ ॥ कूर्म उवाच ॥ सृष्टिं चिन्तयतस्तस्य कल्पादिषु यथा पुरा अबुद्धिपू
र्वकः सर्गः प्रादुर्भूतस्तमोमयः ॥ तमो मोहो महामोहस्तामिस्रश्चान्धसंज्ञितः ॥ अविद्या पंचपर्वैषा प्रादुर्भूता महात्मनः
पंचधावस्थितः सर्गो ध्यायतः सोऽभिमानिनः ॥ संवृतस्तमसा चैव बीजकुम्भवदावृतः ॥ बहिरन्तश्चाप्रकाशस्त
ब्धो निःसंज्ञ एव च ॥ मुख्या नगा इति प्रोक्ता मुख्यसर्गस्तु स स्मृतः ॥ तं दृष्ट्वा साधकं सर्गममन्यदपरं प्रभुः ॥ तस्या
भिध्यायतः सर्गस्तिर्यक्स्रोतोऽभ्यवर्तत ॥ यस्मात्तिर्यक्प्रवृत्तः स तिर्यक्स्रोतस्ततः स्मृतः ॥ पश्वादयस्ते वि
ख्याता उत्पथग्राहिणो द्विजाः ॥ तमप्यसाधकं ज्ञात्वा सर्गमन्यं ससर्ज ह । ऊर्ध्वस्रोत इति प्रोक्तो देवसर्गस्तु
सात्त्विकः ॥ ते सुखप्रीतिबहुला बहिरन्तस्त्वनावृताः प्रकाशा बहिरन्तश्च स्वभावाद्देवसंज्ञिताः । ततोऽभिध्यायतस्त
स्य सत्याभिध्यायिनस्तदा ॥ प्रादुरासीत्तदाऽव्यक्तादर्वाक्स्रोतस्तु साधकः । ते च प्रकाशबहुलास्तमोद्रिक्ता रजो
धिकाः । दुःखोत्कटाः सत्त्वयुता मनुष्याः परिकीर्तिताः । तं दृष्ट्वा चापरं सर्गममन्यद्भगवानजः । तस्याभिध्यायतः
सर्गः सर्गो भूतादिकोऽभवत् ॥ ते परिग्राहिणः सर्वे संविभागरताः पुनः । खादनाश्चाप्यशीलाश्च भूताद्याः प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कूर्म ॥ रिकी र्त्तिताः इत्येते पंच कथिताः सर्गास्ते द्विजपुंगवाः प्रथमो महतः सर्गो विज्ञेयो ब्रह्मणस्तु सः ॥ तन्मात्राणां द्वितीयास्तु भू
॥ १२ ॥ त सर्गो हि स स्मृतः वैकारिकस्तृतीयास्तु सर्ग ऐन्द्रियकः स्मृतः ॥ इत्येषः प्राकृताः सर्गः संभूतो बुद्धिपूर्वकः ॥ मुख्यसर्गश्चतुर्थ
स्तु मुख्या वै स्थावराः स्मृताः ॥ तिर्यक्स्रोतस्तु यः प्रोक्तो तिर्यग्योन्यः स पंचमः तथोर्द्ध्वस्रोतसां षष्ठो देवसर्गस्तु स स्मृतः
ततोर्वाक्स्रोतसां सर्गः सप्तमः स तु मानुषः ॥ अष्टमो भौतिकः सर्गो भूतादीनां प्रवर्त्तते ॥ षड्व्याद्यास्तु द्विजपुंगवाः ॥ अग्रे स
सर्ज वै ब्रह्मा मानसानात्मनः समान् ॥ सनकं सनातनं चैव तथैव च सनन्दनं ॥ क्रतुं सनत्कुमारं च पूर्वमेव प्रजापतिः पंचैते
योगिनो विप्राः परं वैराग्यमास्थिताः ईश्वरासक्तमनसो न सृष्टौ दधिरे मतिं ॥ तेष्वेवं निरपेक्षेषु लोकसृष्टौ प्रजापतिः ॥
मुमोह मायया सद्यो मायाविनः परमेष्ठिनः संबोधयामास सुतं जगन्मायो महामुनिः ॥ नारायणो महायोगी योगिचि
त्तरंजनः बोधितस्तेन विश्वात्मा तताप परमं तपः ॥ स तप्यमानो भगवान् किंचित्प्रत्यपद्यत ॥ ततो दीर्घेण कालेन दुःखा
त्क्रोधो व्यजायत ॥ क्रोधाविष्टस्य नेत्राभ्यां प्रापतन्नश्रुबिन्दवः भ्रुकुटीकुटिलात्तस्य ललाटात्परमेष्ठिनः ॥
समुत्पन्नो महादेवः शरण्यो नीललोहितः स एव भगवानीशस्तेजोराशिः सनातनः यं प्रपश्यन्ति विद्वांसः स्वात्मस्थं ॥ राम: ॥
परमेश्वरं ॥ ओंकारं समनुस्मृत्य प्रणम्य च कृतांजलिः ॥ तमाह भगवान् ब्रह्मा सृजेमा विविधाः प्रजाः ॥ निशम्य भगवद्वा ॥ १२ ॥
क्यं शंकरो धर्मवाहनः ॥ स्वात्मना सदृशान् रुद्रान् ससर्ज मनसा शिवः ॥ कपर्दिनो निरातंकांस्त्रिनेत्रान्नील
लोहितान् ॥ तं प्राह भगवान् ब्रह्मा जन्ममृत्युयुताः प्रजाः ॥ सृजेति सोब्रवीदीशो नाहं मृत्युजरान्विताः ॥ प्रजाः स्रक्ष्ये जग

नाथसृजन्नवमुख्याः प्रजाः निवर्य्येसनतदा डंससर्ज कमलोद्भवः। ख्यातिनाभिमानिनले पांगदनलान्त्रिकोधनः। आयोग्नि रंगोल्ले
च यौवाङ्गः पृथिवी तथा॥ नद्यः समुद्राः शैलाश्च वृक्षाश्चैव तथैव च॥ लवाः काष्ठाकलाश्चैव मुहूर्त्ता दिवसाः क्षपाः। अर्द्ध
मासाश्च मासाश्च अयनाब्दयुगादयः स्थानाभिमानिनस्त्वे ते स्थानाधिकाननञ्जज्ञिरे तः। मरीचिमत्र्यङ्गिरसः पुलस्त्यं पुलहं क्र
तुं दक्षमत्रिं वसिष्ठं च धनं संकल्पमेव च। नेत्राभ्यां मुक्तिनामानं धर्मं च व्यवसायतः॥ संकल्पे वै च संकल्पान सर्वलोक
पितामह॥ पुलस्त्यं च तथोदाना द्याना व्रजलहं भृतिं॥ अयानाम्यक्तमध्यगुंख मानाद्व वसिष्ठकं॥ इत्येनाव्रलागाः स
ष्टाः साधकार गहमेधिनः॥ स्त्राल्प्यापवाससनंदनं धर्मसेः सेप्रवर्जितः॥ ततोदेवासुरापितनन्मनुष्यांश्चचतुष्टयं॥ सिसृ
क्षुर्भगवानीशः स्वमाम्याननमयोजयत॥ युक्तात्मनस्तमोमात्रा सुक्ताभूत् यज्जाप्रजन॥ युक्तात्मनस्तमोमात्राद्ये द्रिक्ता
भूयत्र जायते॥ ततोस्य जघनात्पूर्वमसुराजज्ञिरे सुताः॥ उत्ससर्ज सुतांस्तां तां नत्तेषु तषोन्तमः॥ सावोत्सृष्टा ततुले
नसघो रात्रिर्जायतः॥ सा तमो बहुला यस्मात्ततोत्रा स्वयं स्वतः॥ सत्त्वमात्रात्मिकां देव तनुं यत्नांग्रहीन वान्
ततोस्य मुखतो देवा दीव्यतः संप्रजज्ञिरे॥ त्यक्तासापि तनुं तेन सत्त्वप्रायमभूद्दिनं॥ तस्मादहोधर्मयुक्ता देवताः स
मुपागते॥ सत्त्वमात्रात्मिकामेव ततोन्यां जगृहे तनुं॥ पितृवन्मन्यमानस्य पितरस्तस्य जज्ञिरे॥ उत्ससर्ज पितृं
नसृष्ट्वा ततस्तामपि विश्वकृत्॥ सापि चोत्सृष्टा ततोल्लोनसंध्या व्यजायत॥ तस्मादहर्देवतानां रात्रिः स्याद्देवविद्वि
षां॥ ततोर्मध्ये पितृणां तु मूर्त्तिः संध्या गरीयसी॥ तस्माद्देवासुराः सर्वे ऋषयो मानवास्तथा॥ उपासत तद्यु — त

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥कूर्म॥
॥१३॥

स्याः ते ते मे गंधमामानत॥ ततो मा पा मा तान्विकाब्रह्मा तनुमन्यां तनो सृजन्॥ तमो स्यजज्ञिरे पुत्राः मनुष्या रजोत्कटाः॥ ता मथ्या
भ न तन्याज तनुं सघः प्रजापतिः ज्योत्स्ना सा चा भवद्विप्राः प्राक्संध्याया भिधीयते॥ ततः स भगवान्ब्रह्मा संप्राप्य द्विजपुं
गवाः॥ मूर्तिं तमोरजःप्रायां पुनरेवाभ्ययुंजत॥ अंधकारे क्षुधाविष्टा राक्षसास्तस्य जज्ञिरे॥ पुत्रास्तमोरजःप्राया बलिनस्ते नि
शाचराः॥ सर्पा यक्षास्तथा भूता गंधर्वाः संप्रजज्ञिरे॥ रजस्तमोभ्यामाविष्टास्ततो ऽन्यानसृजत्प्रभुः॥ वयांसि वयसः सृष्ट्वा अवि
न्वै वक्षसो ऽसृजत्॥ मुखतो ऽजान् ससर्जाथ उदराद्गाश्च निर्ममे॥ पद्भ्यां चाश्वान्समातंगान्रासभान्गवयान्मृगान्॥ उष्ट्रा
न्श्वतरांश्चैव न्यंकूनन्यांश्च जातयः॥ ओषध्यः फलमूलिन्यो रोमभ्यस्तस्य जज्ञिरे॥ गायत्रं च ऋचं चैव त्रिवृत्सोमं रथंतरं
अग्निष्टोमं च यज्ञानां निर्ममे प्रथमान्मुखात्॥ यजूंषि त्रैष्टुभं छंदः स्तोमं पंचदशं तथा॥ बृहत्साममतिरात्रं च पश्चिमाद
सृजन्मुखात्॥ एकविंशमथर्वाणमाप्तोर्यामाणमेव च॥ अनुष्टुभं सवैराजमुत्तरादसृजन्मुखात्॥ उच्चावचानि भू
तानि स्थावराणि चराणि च॥ यक्षान्पिशाचान्गंधर्वांस्तथैवाप्सरसः शुभाः॥ नरकिंनररक्षांसि वयःपशुमृगोरगान्॥ ॥राम:॥ ॥१३॥
अव्ययं च व्ययं चैव द्वयं स्थावरजंगमं॥ तेषां ये यानि कर्माणि प्राक्सृष्टेः प्रतिपेदिरे॥ तान्येव ते प्रपद्यंते सृज्यमानाः पुनः पुन
:पुनः॥ हिंस्राहिंस्रे मृदुक्रूरे धर्माधर्मावृतानृते॥ तद्भाविताः प्रपद्यंते तस्मात्तत्तस्य रोचते॥ महाभूतेषु नानात्वमिंद्रि
यार्थेषु मूर्तिषु॥ विनियोगं च भूतानां धातैव व्यदधात्स्वयं॥ नाम रूपं च भूतानां प्राकृतानां प्रपंचनं॥ वेदश
ब्दाः पुरा देवो निर्ममे स महेश्वरः॥ आर्षाणि चैव नामानि याश्च वेदेषु दृष्टयः॥ शर्वर्यंते प्रसूतानां तान्येवैभ्यो द

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दास्मजः पर्य्यन्तानत लिंगानि नानारूपाणि पर्य्यये ॥ दृष्ट्वं नेता निनान्ये वान्नथा भावागादिषु ॥ ॥ इति श्रीकूर्म्मपुराणे सप्तमो
ध्यायः ॥ ७ ॥ श्रीकूर्म्म उवाच ॥ एवं भूतानि सृष्टानि स्थावराणि चराणि च । यदास्य तां प्रजाः सृष्टा न व्यवर्द्धन्त धीमतः । तमोमा
त्रावृतो ब्रह्मा तदाशोचत दुःखितः ॥ ततः स विदधे बुद्धि मर्थनिश्चयगामिनीं । अथात्मनि समद्राक्षीत् तमोमात्रां नियामि
कां राजः सत्त्वं च संवृत्य वर्त्तमानं स्वधर्मतः । तमस्तु व्यनुदत्पश्चाद्रजः सत्त्वेन संयुतः ॥ तत्तमः प्रतिनुन्नं वै मिथुनं समजायत
अधर्मश्चरणो विप्र हिंसा चाशुभलक्षणा । स्वां तनुं स ततो ब्रह्मा तामपोहत भास्वरां ॥ द्विधाकरोत् पुनर्देहमर्द्धेन पुरुषोऽभवत्
अर्द्धेन नारी पुरुषो विराजमसृजत्प्रभुः ॥ नारीं च शतरूपाख्यां योगिनीं ससृजे शुभां ॥ सा दिवं पृथिवीं चैव महिम्ना व्याप्य सं
स्थिता ॥ योगभृगुपुलहश्चैव क्रतुः परमधर्मवित । अग्निर्वसिष्ठो वह्निश्च पितरश्च यथाक्रमं ॥ ख्यात्याद्या जगृहुः कन्या मुनयो
ऽतान सत्तमाः । श्रद्धायामात्मजः कामो दर्पो लक्ष्मीसुतः स्मृतः ॥ धात्यांतु नियमः पुत्रः सन्तुष्ट्यां सन्तोष उच्यते ॥ पुष्ट्यां लाभः
सुतस्त्वापि मेधापुत्रः श्रमस्तथा ॥ क्रियायाश्चाभवत्पुत्रो दंडः समय एव च ॥ बुद्ध्यां बोधः सुतस्तद्वदप्रमादोप्यजायत । लज्जा
या विनयः पुत्रो वपुषो व्यवसायकः । क्षेमः शान्तिसुतश्चापि सिद्धिसिद्धेरजायत ॥ यशः कीर्त्तिसुतस्तद्वदित्येते
धर्म्मसूनवः ॥ कामस्य हर्षः पुत्रोऽभूद्देवानन्दोप्यजायत ॥ इत्येष वै सुखोदर्कः सर्गो धर्मस्य कीर्त्तितः । जज्ञे हिंसा त्वधर्मा द्वै
निःकृतिं चानृतं सुतं ॥ निःकृत्यनृतयोर्जज्ञे भयं नरकमेव च ॥ माया च वेदना चैव मिथुनं त्विदमेतयोः ॥ भयाज्जज्ञेऽथ वै
मायां मृत्युं भूतापहारिणं । वेदनायां सुतश्चापि दुःखं जज्ञेऽथ रौरवात ॥ मृत्योर्व्याधिजराशोकक्रोधासूयाः प्रजज्ञिरे ॥ दुःखो

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ कू·र्म· ॥ नराः स्मृतास्ते ने सर्वे वा धर्मलक्षणाः ॥ तेषां भार्यास्ति पुत्रो वा सर्वे नैके हरेन्नरः ॥ इत्येष नामसः सर्गायते धर्मो नियामकः संक्षेपे
॥ १४ ॥ णमया प्रोक्ता विसृष्टिर्मुनिपुंगवाः ॥ ॥ इति श्रीकूर्मपुराणेऽष्टमोऽध्यायः ॥ ८ ॥ सूत उ० ॥ एवं श्रुत्वाथ वचनं नारदाद्या मह
र्षयः ॥ प्रणम्य वरदं विष्णुं पप्रच्छुः संशयान्विताः ॥ मुनय ऊचुः ॥ कथितो भगवन् सर्गो मुख्यादीनां जनार्दनः ॥ इदानीं संशयं
चेममस्माकं छेत्तुमर्हसि ॥ कथं स भगवानीशः पूर्वजोपि पिनाकधृक ॥ पुत्रत्वमगमच्छंभुर्ब्रह्मणो व्यक्तजन्मनः ॥ कथं च भग
वान् जज्ञे ब्रह्मा लोकपितामहः ॥ अण्डजो जगतामीशस्तन्नो वक्तुमिहार्हसि ॥ ॥ कूर्म उवाच ॥ शृणुध्वमृषयः सर्वे शंकरस्या
मितौजसः ॥ पुत्रत्वं ब्रह्मणस्तस्य पद्मयोनित्वमेव च ॥ अतीतकल्पावसाने तमोभूतं जगत्त्रयं ॥ आसीदेकार्णवं घोरं नदे
वाद्या न चर्षयः ॥ तत्र नारायणो देवो निर्जने निरुपप्लवे ॥ आश्रित्य शेषशयनं सुष्वाप पुरुषोत्तमः ॥ सहस्रशीर्षा भूत्वा स स
हस्राक्षः सहस्रपात ॥ सहस्रबाहुः सर्वज्ञश्चिन्त्यमानो मनीषिभिः ॥ पीतवासा विशालाक्षो नीलजीमूतसंनिभः ॥ महा
विभूतिर्योगात्मा योगिनां हृदयापरः ॥ कदाचित्तस्य सुप्तस्य लीलार्थं दिव्यमद्भुतं ॥ त्रैलोक्यसारं विमलं नाभ्यां पंकज
मुद्बभौ ॥ शतयोजनविस्तीर्णं तरुणादित्यसंनिभं ॥ दिव्यगंधमयं पुण्यं कर्णिकाकेसरान्वितं ॥ तस्यैवं सुचिरं कालं वर्त
मानस्य शार्ङ्गिणः ॥ हिरण्यगर्भो भगवांस्तं देशमुपचक्रमे ॥ स तं करेण विश्वात्मा समुत्थाप्य सनातनं ॥ प्रोवाच मधुरं वा ॥ राम: ॥
क्यं मायया तस्य मोहितः ॥ अस्मिन्नेकार्णवे घोरे निर्जने तमसावृते ॥ एकाकी को भवाञ्छेते ब्रूहि मे पुरुषर्षभ ॥ तस्य तद्व ॥ १४ ॥
नं श्रुत्वा विहस्य गरुडध्वजः ॥ उवाच देवं ब्रह्माणं मेघगंभीरनिःस्वनः ॥ भो भो नारायणं देवं लोकानां प्रभवाप्ययं ॥ महायोगी

14

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ध्वं मां वै जानीहि पुरुषोत्तमं ॥ मया पद्मजगर्भस्थं नैव लोकपितामहः । स एवं तमाहातान्निपसमुद्भवैः समभिद्रुतं । एवमा
भाष्य विश्वात्मा प्रोवाच पुरुषो हरिः जानन्नपि महायोगी को भवानिति वेधसं । ततः प्रहस्य भगवान् ब्रह्मा वेदनिधिः प्रभुः ॥
प्रत्युवाचयजुया------श्लक्ष्णया गिरा । अहं धाता विधाता च स्वयंभूः प्रपितामहः ॥ मय्येव संस्थितं विश्वं ब्रह्माहं विश्वतोमुखः
श्रुत्वा वाचं गां भगवान् विष्णुः सत्यपराक्रमः । अनुज्ञातः यथा योगेन प्रविष्टो ब्रह्मणस्तनुं ॥ त्रैलोक्यमेतत्सकलं सदेवासुरमानु
षं ॥ उदरे तस्य देवस्य दृष्ट्वा विस्मयमागतः ॥ तदास्य वक्त्रान्निःक्रम्य पन्नगेंद्रनिकेतनः अप्यापि भगवान् विष्णुः पितामहमथाब्र
वीत् ॥ भवानप्येवमेवाद्य शाश्वतं हि ममोदरं प्रविश्य लोकान्पश्यैतान्विचित्रान्पुरुषर्षभ ॥ ततः प्रह्लादिनीं वाणीं श्रुत्वा
तस्याभिनंद्य च । श्रीपतेरुदरं भूयं प्रविवेश कुशध्वजः ॥ तानेव लोकान् गर्भस्थानपश्यत्समविक्रमः ॥ पर्य्यटित्वाथ देवस्य द
शं तस्य वै हरेः ॥ ततो ह्यपश्यत्सर्वाणि विहितानि महात्मना ॥ जनार्द्दनेन ब्रह्मासौ नाभ्यां द्वारमविंदत ॥ तत्र योगबलेना
सौ प्रविश्य कनकांडजः ॥ उज्जहारात्मनो रूपं पुष्कराच्चतुराननः ॥ विरराजारविंदस्थः पद्मगर्भसमद्युतिः ॥ ब्रह्मा स्वयंभू
र्भगवान् जगद्योनिः पितामहः ॥ स मन्यमानो विश्वेशमात्मानं परमं पदं । प्रोवाच विष्णुं पुरुषं मेघगंभीरया गिरा ॥ किं
कृतं भवतेदानीमात्मनो जयकांक्षया ॥ एकोऽहं प्रबलो नान्यो मां वै कोऽभिभविष्यति । श्रुत्वा नारायणो वाक्यं ब्रह्मणोक्तमतः पर
मेषितः ॥ सांत्वपूर्वमिदं वाक्यं बभाषे मधुरं हरिः ॥ भगवान् धाता विधाता च स्वयंभूः प्रपितामहः ॥ न मात्सर्याभियोगेन द्व
राणि पिहितानि मे ॥ किं तु लीलार्थमेवैतत् न त्वां बाधितुमिच्छया ॥ को हि बाधितुमन्विच्छेद्देवदेवं पितामहं ॥ नहि ब्रह्मं

॥ कूर्मं ॥ वाध्यमेवब्रह्मन्मान्योहिसर्व्वथाभवान् ॥ ममर्व्वयकल्पाराध्यमयायहृतेनव । त्रयस्मात्कारणाब्रह्मन्पुत्रोभवममेभवान् । पद्म
॥ १५ ॥ योनिरितिख्यातोमत्प्रियार्थंजगन्मयः ॥ ततःसभगवान्देवोवरंदत्वाकिरिटिने । प्रहृष्टमनसंगत्वापुनर्विष्णुमभाषत
भगवान्सर्व्वान्यकोनेतःसर्व्वेषांपरमेश्वर ॥ मन्ययंसर्व्वमेवेदंब्रह्मतापुरुषःपरः । नावाभ्यांविद्यतेत्वन्योलोकानांप
रमेश्वरः ॥ एकोमूर्त्तिस्त्रिधाभिन्नोनारायणपितामहौ ॥ मैनैवमुक्तोब्रह्माणंवासुदेवोब्रवीदिदं ॥ इयंप्रतिज्ञाभवतोवि
नाशायभविष्यति । किंत्वपश्यसियोगेनब्रह्माऽधिपतेर्मव्ययं ॥ प्रधानपुरुषेशानंवेदाहंपरमेश्वरं ॥ यंनपश्यन्ति
योगीन्द्राःसांख्याःअपिमहेश्वरं ॥ अनादिनिधनंब्रह्मतमेवशरणंव्रज ॥ ततःक्रुद्धोम्बुजाभाक्षंब्रह्माप्रोवाचकेशवं
भगवान्नमात्मानंवेद्मितत्परमाक्षरं ॥ ब्रह्माणंजगतामेकमात्मानंपरमंपदं । नावाभ्यांविद्यतेत्वन्योलोकानांपरमेश्वरः
संत्यज्यनिद्रांविपुलांस्वमात्मानंविलोकय । तस्यतत्क्रोधजंवाक्यंश्रुत्वापिसतदाप्रभुः ॥ मामैवंवदकल्याणपरिवा
दंमहात्मनः ॥ नमेह्यविदितंब्रह्मन्नान्यथाहंवदामिते ॥ किंतुमोहयतिब्रह्मात्वांनपरमेश्वरं ॥ मयद्यशेषविशेषा
णांहेतुरात्मसमुद्भवा ॥ एतावदुक्त्वाभगवान्विष्णुस्तूष्णींबभूवह । ज्ञात्वातत्परमंतत्वंस्वमात्मानंसुरेश्वरः ॥ कुतोह्य ॥ रामः ॥
परिमेयात्माभूतानांपरमेश्वरः ॥ प्रसादंब्रह्मणोकर्तुंप्रादुरासीत्ततोहरः । ललाटनयनोदेवोजटामण्डलमण्डितः ॥ ॥ १५ ॥
त्रिशूलपाणिर्भगवानतेजसांपरमोनिधिः ॥ दिव्यांविशालांग्रथितांग्रहैःसार्केंदुतारकैः ॥ मालामत्यद्भुताकारांधा
रयानापदांतंत्रिनी ॥ तंदृष्ट्वादेवमीशानंब्रह्मालोकपितामहः । मोहितोमाययात्यर्थंपीतवाससमब्रवीत् ॥ कएषपु

15

कृषो नीलः शूलपाणिस्त्रिलोचनः ॥ तेजोराशिरमेयात्मा समायातिर्जनार्दनः तस्य तद्वचनं श्रुत्वा विष्णुर्दानवमर्दनः ॥ अप
श्यदीश्वरं देवं ज्वलन्तं विमलेम्भसि ॥ तान्त्वां तं परमं भावमैश्वरं ब्रह्मभावनः । प्रोवाचवीक्ष्य भगवान् देवपितामहं ॥ अहं दे
वो महादेवः स्वयंज्योतिः सनातन ॥ अनादिनिधनश्चिंत्यो लोकनामीश्वरो महान ॥ शंकरः शंभुरीशानः सर्वात्मा परमे
श्वरः ॥ भूतनामधिपो योगी महेशो विमलः शिवः एष धाता विधाता च प्रधानः प्रभुरव्ययः यं प्रपश्यन्ति यतयो ब्रह्म
णा नेन भाविना ॥ स त्वमेव जगत्कृत्स्नं नापि संहरते तथा ॥ कालो भूत्वा महादेवः केवलो निष्कलः शिवः ब्रह्मणो विद
धे पूर्वं भवं तं यः सनातनः ॥ वेदांश्च प्रददौ तुभ्यं सोयमायातिशंकरः ॥ अस्यैव चापरां मूर्त्तिं विश्वयोनिं सनातनीं
वासुदेवाभिधानां मामवैहि प्रपितामह ॥ किं न पश्यसि योगेशं ब्रह्माधिपतिमव्ययं ॥ दिव्यं भवतु ते चक्षुर्येन द्रक्ष्य
सि तत्परं ॥ लब्ध्वा शैवं तदा चक्षुर्विष्णोर्लोकपितामह ॥ बुबुधे परमेशानः पुरतः समवस्थितं ॥ लब्ध्वा परमं ज्ञान
मैश्वरं प्रपितामहः ॥ प्रपेदे शरणं देवं तमेव पितरं शिवं ॥ ओंकारं समनुस्मृत्य संस्तभ्यात्मानमात्मना ॥ अथर्वशिर
सा देवं तुष्टाव च कृताञ्जलिः ॥ संस्तुतस्तेन भगवान् ब्रह्मणा परमेश्वरः ॥ अवाप्य परमां प्रीतिं व्याजहार स्मयन्निव ॥ म
त्समस्त्वं न सन्देहो वत्सभक्तश्च मे भवान् ॥ मयैवोत्पादितः पूर्वं लोकसृष्ट्यर्थमव्ययम् ॥ त्वमात्मा ह्यादिपुरुषो
मम देहसमुद्भवः ॥ निरीक्ष्ये विष्णुं सं प्रणम्योवाच शंकरं ॥ भगवान्भूतभव्येश महादेवाम्बिकापते ॥ त्वामेव पुत्र
मिच्छामि त्वयावा सदृशं प्रभो ॥ मोहितास्मि महादेव मायया सूक्ष्मया त्वया ॥ न जाने परमं भावं यथातथ्येन ते

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥कू॰ पु॰॥ ॥१८॥

शिव ॥ त्वमेव देवभक्तानां माता भ्राता पिता सुहृत् ॥ प्रसीद तव पादाब्जं नमामि शरणं गतः ॥ स तस्य वचनं श्रुत्वा जगन्नाथो वृ-
षध्वजः ॥ व्याजहार तदा पुत्रं समालोक्य जनार्दनं ॥ यदर्थितं भगवता तत्करिष्यामि पुत्रक ॥ विज्ञानमैश्वरं दिव्यमुत्पत्स्य-
ति तवानघ ॥ त्वमेव सर्वभूतानामादिकर्त्ता नियोजितः ॥ कुरुष्व नेश देवेश मायालोकपितामह ॥ एष नारायणोऽनन्तो
ममैव परमा तनुः ॥ भविष्यति तवेशानो योगक्षेमवहो हरिः ॥ एवं व्याहृत्य हस्ताभ्यां प्रीतः प्रीतः स परमेश्वरः ॥ संस्पृश्य
देवं ब्रह्माणं हरिं वचनमब्रवीत् ॥ तुष्टोऽस्मि सर्वथाहं ते भक्त्या त्वं जगतां मयः ॥ वरं वृणीष्व भावाभ्यां मयो नित्यपरमा-
र्थतः ॥ श्रुत्वाथ देववचनं विष्णुर्विश्वमयं जगत् ॥ प्राह प्रसन्नया वाचा समालोक्य तनुं सुखं ॥ एष एव वरः श्लाघ्यो
यदहं परमेश्वरं ॥ पश्यामि परमात्मानं भक्तिर्भवतु मे त्वयि ॥ तथेत्युक्त्वा महादेवः पुनर्विष्णुमभाषत ॥ भगवान्
सर्वस्य कार्यस्य कर्त्ता सहमधिदैवतं ॥ त्वन्मयं मन्मयं चैव सर्वमेतन्न संशयः ॥ भवान् सोमस्त्वहं सूर्यो भवान् रात्रिरहं
दिनं ॥ भवान् प्रकृतिरव्यक्तमहं पुरुष एव च ॥ भवान् ज्ञानमहं ज्ञाता भवान् मायाहमीश्वरः ॥ भवान् विद्यात्मिका
शक्तिः शक्तिमानहमीश्वरः ॥ योऽहं स निष्कलो देवः सोऽपि नारायणः प्रभुः ॥ एकीभावेन पश्यन्ति योगिनो ब्रह्मवादि-
नः ॥ त्वामनाश्रित्य विश्वात्मन् योगी मामुपैष्यति ॥ पालयैतज्जगत्कृत्स्नं सदेवासुरमानुषं ॥ इतीदंम
गवाननादि स्वमायया मोहितभूतभेदः ॥ जगाम जन्मर्द्धिविनाशहीनं धामैकमव्यक्तमनन्तशक्तिः ॥
इति कूर्मपुराणे पद्मोद्भवप्रादुर्भावेन नवमोऽध्यायः ॥ ९ ॥ कूर्म उवाच ॥ गते महेश्वरे देवे स्वपदं च पितामहः ॥

॥राम:॥ ॥१८॥

16

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नदेवमहत्स्य यं मे जेनाभिसम्भ्रुत्थिते ॥ अथ दीर्घेण कालेन तत्राप्रतिमयौजसौ ॥ महासुरौ समायातौ भ्रातरौ मधुकैटभौ ॥ क्रोधेन
महताविष्टौ पतपर्वं तमिवृतौ ॥ कर्णात् नर समुद्भूतौ देवदेवस्य शार्ङ्गिणः ॥ तावापतन्तौ समीक्ष्य हनारायणमणो विभुः ॥
त्रैलोक्यकण्टकावुभौ ॥ न तत्यामहनप्युद्धं नयोः स्वप्नाम्भसि निहिजा ॥ व्यजयत्केशभंगिसुविष्णुश्च व्यजयन्मधुं ॥ पद्मे सनाभि
--- जगन्नाथः पितामहे ॥ बभाषे मधुरं वाक्यं स्नेहनाविष्टमनाहरिः ॥ अस्मान्मयोद्यमानस्त्वं पद्मादवतर प्रभोः नाहं भगवतं
शक्तोभिसोढुं तेजोमयं गुरुं ॥ ततोवतीर्य विश्वात्मा देहमाविश्य वक्रिणः ॥ अवापवैष्णवीं निद्रां मग्ने भूतोप्यविष्णुना ॥ सह
तेनतपाविश्यं शांखचक्रगदाधरः ॥ ब्रह्मानारायणाख्योसौ सुष्वापसलिलेतदा ॥ सोनुभूयचिरं कालमानन्दं परमात्मनः
॥ अनाद्यनन्तमद्वैतं त्वात्मानं ब्रह्मसंज्ञितं ॥ ततः प्रभातेयोगात्मा भूत्वा देवश्चतुर्मुखः ॥ ससर्ज सृष्टिं तद्रूपां वैष्णवं भाव
मास्थितः ॥ पुरस्तादसृजद्देवः सनन्दं सनकंतथा ॥ ऋभुं सनत्कुमारं च पूर्वजं तं सनातनं ॥ ते द्वन्द्वमोहनिर्मुक्ताः परं वैराग्यमास्थि
ताः ॥ विदित्वा परं भावं नाते पिदधिरे मतिं ॥ तेष्वेवं निरपेक्षेषु लोकसृष्टौ पितामहः ॥ बभूव नष्टचेतावै मायया पर
मेष्ठिनः ॥ ततः पुराणपुरुषो जगन्मूर्त्तिः सनातनः ॥ व्याजहारात्मनः पुत्रं मोहनाशाय पद्मजं ॥ कच्चिन्न विस्मृतो देवः शू
लपाणिः सनातनः ॥ यदुक्तवेपुरा तुभ्यं पुत्रत्वे भवदाकरः ॥ अवाप संज्ञां गोविन्दात् पद्मयोनिः पितामहः ॥ प्रजाः स्रष्टुं मन
श्चक्रे तपः परमदुष्करं ॥ तस्यैवं तप्यमानस्य न किंचित् समवर्त्तत ॥ ततो दीर्घेण कालेन दुःखात्क्रोधोभ्यजायत ॥ क्रोधा
विष्टस्य नेत्राभ्यां प्रापतन्नश्रुबिंदवः ॥ ततस्तेभ्योश्रुबिन्दुभ्यो भूताः प्रेतास्तदाभवन् ॥ सर्वांस्तानग्रजान्दृष्ट्वा ब्रह्मात्मानमनिंदत

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ कू.पु. ॥ नन्दे प्राणांश्च भगवा न्दक्षोथ विष्टुः प्रजापतिः॥ ततः प्राणान् मयोनह्य त्राडुरासीत्स्वयंभो त्यान सहस्रादित्यसमं काशो युगान्तदह
॥ ७ ॥ नोपमः॥ रुरोद सुस्वरं घोरं देवदेवः स्वयं शिवः रोदमानं ततो ब्रह्मा मा रोदीरित्यभाषत रोदनाद्रुद्र इत्येवं लोके ख्यातिं गमिष्य
सि॥ अन्यानि सप्त नामानि पत्नीः पुत्रांश्च शाश्वतान्॥ स्थानानि चैषां सप्तानां ददौ लोकपितामहः॥ भवः शर्वोथ ईशानः
पशूनां पतिरेव च॥ भीमश्चोग्रो महादेवस्तानि नामानि सप्त वै॥ सूर्यो जलं मही वह्निर्वायुराकाशमेव च॥ दीक्षितो ब्राह्मणश्चंड
इत्येतास्त्वष्ट मूर्तयः स्थानेष्वेतेषु ये रुद्रं ध्यायन्ति प्रणमन्ति च॥ तेषामघं न दैवाद्ददाति परमं पदं॥ सुवर्चला तथैवोमा
विकेशी वल्लिका तथा स्वाहा दिशश्च दीक्षा च रोहिणी चेति पत्नयः॥ शनैश्चरस्तथा शुक्रो लोहितांगो मनोजवः॥ स्कंदः स्व
र्गोथ संतानो बुधश्चैषां सुताः स्मृताः एवं प्रकारो भगवान् देवदेवो महेश्वरः॥ प्रजा धर्मं च कामं च त्यक्त्वा वैराग्यमाश्रि
तः॥ आत्मन्याधाय चात्मानमैश्वरं भावमास्थितः॥ पीत्वा तदक्षरं ब्रह्म शाश्वतं परमामृतं॥ प्रजाः सृजेति चादिष्टो ब्रह्म
णा नीललोहितः॥ स्वात्मना सदृशान् रुद्रान् ससर्ज मनसा शिवः॥ कपर्दिनो निरातंकान् नीलकंठान् पिनाकिनः॥ त्रि
शूलहस्तान् ऋष्टिघ्नान् महानन्दांस्त्रिलोचनान्॥ जरामरणनिर्मुक्तान् महावृषभवाहनान्॥ वीतरागांश्च सर्वज्ञान् को ॥ पु. ॥
टिकोटिशतान् प्रभुः॥ तान् दृष्ट्वा विविधान् रुद्रान् निर्मलान् नीललोहितान्॥ जरामरणनिर्मुक्तान् व्याजहार हरं गुरुः॥ मा स्रा ॥ ७ ॥
क्षीरीदृशीर्देव प्रजा मृत्युविवर्जिता अन्याः सृज त्वं भूतेश जन्ममृत्युसमन्विताः॥ ततस्तमाह भगवान् कपर्दी कामशास
नः॥ नास्ति मे तादृशः सर्गः सृज त्वमशुभाः प्रजाः॥ ततः प्रभृति देवोसौ न प्रसूतेशुभाः प्रजाः॥ स्वात्मजैरेव तै रुद्रैर्निवृत्तात्मा॥

17

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्यात्त्वनिःशून्यस्यात्मुखं नेत्रनस्यासीद्देवदेवस्य धूर्जटिनः ॥ तानं वे रागमैश्वर्यं नयः सर्वक्षमा ह्यतिः ॥ ईदृक्त्वमात्मसंवे
द्योत्वधिष्ठितं नमेवच अग्न्यपानि दहे नं सदैवमानसे नदेः श्रीतिर्विस्फारलोचनः । ज्ञात्वा परमं भावमेश्वरं ज्ञानचक्षु
षं ॥ कृत्वा जगन्नामीशं कृत्वाञ्जलिसंपुटं जलि ॥ ब्रह्मोवाच ॥ नमस्ते भगवन् देव नमस्ते परमेश्वरः ॥ नमः शिवाय देवा
य नमस्ते ब्रह्मरूपिणे ॥ नमोऽस्तु ते महेशाय नमः शान्तीय हेतवे ॥ प्रधानपुरुषेशाय योगाधिपतये नमः ॥ नमः काल
रुद्राय महाग्रासाय शूलिने नमः पिनाकहस्ताय त्रिनेत्राय ते नमो नमः ॥ नमस्त्रिमूर्त्तये तुभ्यं ब्रह्मणो जनकाय ते ॥ ब्रह्मवि
द्याधिपतये ब्रह्मविद्याप्रदायिने ॥ नमो देवरहस्याय कालकालाय ते नमः ॥ वेदान्तसाररत्नाय नमो वेदात्ममूर्त्तये
नमो बुद्धाय शुद्धाय योगिनां गुरवे नमः ॥ प्रहीणशोकैर्विविधैर्भूतैः परिवृताय नमो नमो ब्रह्मण्यदेवाय ब्रह्माधिपतये
नमः ॥ त्र्यंबकाय च देवाय नमस्ते परमेष्ठिने ॥ नमो दिग्वाससे तुभ्यं नमो मुण्डाय दण्डिने ॥ अनादिमलहीनाय ज्ञानगम्या
य ते नमः ॥ नमस्ते निःप्रपञ्चाय निराभासाय ते नमः ॥ ब्रह्मणो विश्वरूपाय नमस्ते परमात्मने ॥ त्वयैव सृष्टमखिलं
त्वय्येव सकलं स्थितं ॥ त्वया संह्रियते विश्वं प्रधानाद्यं जगन्मय ॥ त्वमीश्वरो महेशपरमात्मने ॥ त्वयैव सृष्टमखि
लं त्वय्येव सकलं स्थितं ॥ त्वया संह्रियते विश्वं प्रधानाद्यं जगन्मय ॥ त्वमीश्वरो महादेवः परं ब्रह्म महेश्वरः ॥ परमेष्ठि
खिलं त्वय्येव सकलं स्थितं ॥ त्वया संह्रियते विश्वं प्रधाप्रधानाद्यं जगन्मया ॥ त्वमीश्वरो महादेवः परं ब्रह्म महेश्व
रः ॥ परमेष्ठि शिवः शान्तः पुरुषो निष्कलो हरः ॥ त्वमक्षरं परं ज्योतिस्त्वं कालः परमेश्वरः ॥ त्वमेव पुरुषोऽनन्तः प्रधानं प्रकृतिस्तथा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ कूर्म॰ ॥
॥ १८ ॥

भूमिरापोनलो वायुर्व्योमाहंकार एव च यस्य रूपं नमस्यामि परमं ब्रह्मसंज्ञितं ॥ यस्य घौरभवं मूर्द्धा पादौ पृथ्वी दिशो भुजाः आ
काशमुदरं तस्मै विराजे प्रणमाम्यहं ॥ संतापयति यो नित्यं स्वभाभिर्भासयन् दिशः ब्रह्मतेजोमयं विश्वं तस्मै सूर्यात्मने न
मः ॥ आप्याययति यो नित्यं स्वधाम्ना सकलं जगत् ॥ पीयते देवतासंघैस्तस्मै चंद्रात्मने नमः ॥ आत्मन्यवस्थितस्मै चतुर्वक्त्रात्म
नेनमः ॥ यः शेते शेषशयने विश्वमावृत्य मायया ॥ स्वात्मानुभूतियोगेन तस्मै विश्वात्मने नमः ॥ विभर्ति शिरसा नित्यं द्वि
सप्तभुवनात्मकं ॥ ब्रह्माण्डं योऽखिलाधारस्तस्मै शेषात्मने नमः यः परान्ते परानंदं पीत्वा देवैकसाक्षिणः ॥ नृत्यत्यनंतमहिमा
तस्मै रुद्रात्मने नमः ॥ योऽन्तरा सर्वभूतानां नियंता नित्य ईश्वरः ॥ तं सर्वसाक्षिणं देवं नमस्ये भवतां तनुं ॥ यं विनिद्रा जि
तश्वासाः ॥ संतुष्टाः समदर्शिनः ॥ ज्योतिः पश्यन्ति युंजानास्तस्मै योगात्मने नमः ॥ यया संतरते मायां योगी क्षीण
कल्मषः ॥ अपारतरपर्यंतं तस्मै विद्यात्मने नमः ॥ यस्य भासा विभात्यर्को मतायत्तमसः परं ॥ प्रपद्ये तत्परं तत्त्वं तद्रूपं
परमेश्वरं ॥ नित्यानंदं निराधारं निःकलं परमं शिवं ॥ प्रपद्ये परमात्मानं भवंतं परमेश्वरं ॥ एवं ब्रह्ममहादेवं ब्रह्मा
नजावभाषितः प्राञ्जलिः प्रणतस्तस्थौ गृणन् ब्रह्म सनातनं ॥ ततस्तस्मै महादेवो दिव्यं योगमनुत्तमं ॥ ऐश्वर्यं ब्रह्म ॥ १८ ॥
सद्भावं वैराग्यं च ददौ हरः ॥ कराभ्यां सुशुभाभ्यां च संस्पृश्य प्रणतार्तिहा व्याजहार स्वयं देवः सोऽनुगृह्य पितामहः ॥
यत्त्वया प्रार्थितं ब्रह्मन् ॥ पुत्रत्वे भवतो मम कृतं मया तत्सकलं सृजस्व विविधं जगत् ॥ त्रिधा भिन्नोस्म्यहं ब्रह्मन् ब्रह्म
विष्णुहराख्यया ॥ सर्गरक्षालयगुणैर्निःकलः ॥ परमेश्वरः स त्वं ममाग्रजः पुत्रः सृष्टिहेतोर्विनिर्मितः ॥ ममैव दक्षि

॥ राम: ॥

18

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ता देशानामंगात्पुरुषोत्तम ॥ तस्य देवाधिदेवस्य शंभोर्हृदयदेवता ॥ सेवकस्त्वा... सोहं नारस्य पतानंतः ॥ प्रविश्य
शिवमस्मिन्नलगंस्थितं नतेनवः । विभज्यात्मानमेकोपि स्वेच्छापारीं करिष्यति ॥ तथा चान्यानि रूपाणि मम मायाकृतानि
च ॥ स्वरूपः केवलं ॥ तस्यो महादेवः स्वभावतः परेभ्यः परतो देवस्त्रिमूर्तिः परमात्मनः ॥ माहेश्वरी त्रिमयता योगिनां शांति
सर्वदा ॥ तस्यैव परामूर्तिर्ममैवेति पितामह ॥ शाश्वतैश्वर्यविज्ञानतेजो योगिज्ञानं तेजो योगसमन्वितं ॥ सोहं ग्रसामि
सकलमधिष्ठाय तमोगुणं ॥ कालो भूत्वा न तमसा मामन्योभिभविष्यति ॥ यदा यदा हि संनिध्यं गमिष्यति तपःपरपतां नत
नदा मे यो निधिष्यं भविष्यति तवांमज एताडक्का ब्रह्मा तां सोपि वैवस्वतहरः सहैव मानसैः पुत्रैः क्षणादंतरधीयत ॥ सो
पि योगं समास्थाय ससर्ज विविधं जगत् । नारायणाख्यो भगवान्यथा पूर्वं प्रजापतिः ॥ मरीचिभृग्वंगिरसः पुलस्त्यं
पुलहं क्रतुं ॥ दक्षमत्रिं वसिष्ठं च सोसृजद्योगविद्यया ॥ नव ब्रह्माण इत्येते पुराणे निश्चयो मतः ॥ सर्वे ते ब्रह्मणा तु
ल्याः साधका ब्रह्मवादिनः संकल्पं चैव धर्मं च ह्याश्रमान् ॥ स्थानाभिमानिनः सर्वान्यथा ते कथितं पुरा ॥ ॥
इति श्रीकूर्मपुराणे ... दशमोध्यायः ॥ १० ॥ कूर्म उवाच ॥ एवं सृष्ट्वा मरीच्यादीन्देवदेवः पितामहः सहैव
मानसैः पुत्रैस्तताप परमं तपः ॥ ... प्रोक्तो तिभयंकरः ॥ विभज्यात्मानमित्युक्त्वा ब्रह्माणं चांतर्दधे भयात् । तथोक्तो
सौ द्विधा स्त्रीत्वं पुरुषत्वं तथाकरोत् ॥ बिभेद पुरुषत्वं च दशधा चैकधा पुनः ॥ एकादशैते कथिता रुद्रास्त्रिभुवनेश्वराः ।
कपालीशादयो विप्रा देवकार्ये नियोजिताः ॥ सौम्यासौम्यैस्तथा शांताशांतैः स्त्रीत्वं च स प्रभुः ॥ बिभेद बहुधा देवः स्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥कूर्म॰॥ स्वरूपैरसि नैमिसिने ॥ नवै विभूतयो विप्रा विश्रुताः शक्तयो भुवि॥ लक्ष्म्या हृदेयो याहविषा विश्वं व्याप्नोति शंकरी॥ विभज्य पुन
॥१९॥ रीशानी त्वात्मानं शंकराद्विभो॥ महादेवनियोगेन पितामहमुपस्थिता॥ मानामहं भवानुल दक्षस्याऽईनाभव॥ सापित
स्य नियोगेन प्रादुरासीत्प्रजापतेः॥ नियोगाद्ब्रह्मणो देवा दक्षोऽदऽयतां सती॥ दक्षां तडोपिज या हत्वकीया मेवश्थलभर्त
प्रजापति विनिर्दिशात् कालेन परमेश्वरी॥ मेनयामभवत्पुत्री तदा हिमवतः सती॥ सवापि पर्वतं रोस्ते तडाय पार्वती
हिताय सर्वदेवानां त्रिलोकस्यात्मनो द्विजाः॥ सेषा माहेश्वराय देवाय शंकरार्द्धशरीरिणी॥ शिवा सती हैमवती सुरासु
रनमस्कृता॥ तस्याः प्रभावमतुलं सर्वे देवाः सवासवाः॥ विंदति मुनयो वेति वा शंकरो वा स्वयं हरिः॥ एतद्वः कथितं विप्रा
:पुत्रत्वं वपरमेष्ठिनः॥ ब्रह्मणः पद्मयोनित्वं शंकरस्यामितौजस॥ ॥इति श्रीकूर्मपुराणे देव्या प्रवनारे यकादशो
ध्यायः॥ ॥सूत उवाच॥ इत्याकर्ण्य थ मुनयः कूर्मरूपेण भाषितं॥ विष्णुना पुनरेवेमं प्रपच्छुः प्रणता हरिं॥ ऋषय ऊचु
के सा भगवती देवी शंकरार्द्धशरीरिणी॥ शिवा सती हैमवती यथावद्ब्रूहि पृच्छतां॥ तेषां तद्वचनं श्रुत्वा मुनीनां पुरुषो
त्तमः॥ प्रत्युवाच महायोगी ध्यात्वा स्वं परमं पदं॥ श्रीकूर्म उवाच॥ पुरा पितामहेनोक्तं मेरुपृष्ठे सुशोभने॥ प्रत्युवाच
महायोगी ध्यात्वा स्वपदं भवे॥ रहस्यमेतद्विज्ञानं गोपनीयं विशेषतः॥ सांख्यानां परमं सांख्यं ब्रह्मविज्ञानमुत्तमं॥ संसार ॥राम:॥ ॥१९॥
र्णवमग्नानां जंतूनामेकमोचनं॥ या सा माहेश्वरी शक्तिर्ज्ञानरूपातिलालसा॥ व्योमसंज्ञा परा काष्ठा सेयं हैमवती मता॥
शिवा सर्वगतानंता गुणातीता सुनिष्कला॥ एकमेक विभागस्था ज्ञानरूपा निराकुला॥ अनन्यान्या निष्कलत्वेन संस्थि

19

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नानस्य तेन सा ॥ स्वाभाविकी च तन्मूला प्रभा भानोरिवामला ॥ एका माहेश्वरी शक्तिरनेकोपाधियोगतः ॥ परापरेण रूपेण
क्रीडते तस्य सन्निधौ ॥ सेयं करोति सकलं तस्य कार्यमिदं जगत ॥ न कार्यं नापि करणमीश्वरस्येति सूरयः ॥ चतस्रः शक्त
यो देव्यां स्वरूपत्वेन संस्थिताः ॥ अधिष्ठानवशात्तस्याः शृणुध्वं मुनिपुंगवाः ॥ शान्तिर्विद्या प्रतिष्ठा च निवृत्तिश्चेति ताः स्मृता
ः ॥ चतुर्व्यूहस्ततो देवः प्रोच्यते परमेश्वरः ॥ अनया परया देवः स्वात्मानंदं समश्नुते चतुर्ष्वपि च वेदेषु चतुर्मूर्तिर्महेश्वरः ॥ अस्या
स्त्वनादिसंसिद्धमैश्वर्यमतुलं महत ॥ तत्संबंधादनंताया रुद्रेण परमात्मना ॥ सैषा सर्वेश्वरी देवी सर्वभूतप्रवर्तिका
प्रोच्यते भगवान्कालो हरिः प्राणो महेश्वरः ॥ तत्र सर्वमिदं प्रोतमोतं चैवाखिलं जगत ॥ स कालाग्निर्हरो देवो गीयते वेदवा
दिभिः ॥ कालः सृजति भूतानि कालः संहरति प्रजाः ॥ सर्वे कालस्य वशगा न कालः कस्यचिद्वशे ॥ प्रधानं पुरुषस्तत्त्वं महा
नात्मा त्वहंकृतिः ॥ कालेनान्यानि तत्त्वानि समाविष्टानि योगिना ॥ तस्य सर्वजगन्मूर्तिः शक्तिर्मायेति विश्रुता ॥ तयेदं
भ्रामयदीशो मायावी पुरुषोत्तमः ॥ सैषा मायात्मिका शक्तिः सर्वकाला सनातनी ॥ विश्वरूपं महेशस्य सर्वदा संप्रका
शयेत ॥ अन्याश्च शक्तयो मुख्यास्तस्य देवस्य निर्मिताः ॥ ज्ञानशक्तिः क्रियाशक्तिः प्राणशक्तिरिति त्रयं ॥ सर्वासामेव श
क्तीनां शक्तिमंतो विनिर्मिताः ॥ माययैवाथ विप्रेन्द्राः सा चानादिरनश्वरा ॥ सर्वशक्त्यात्मिका माया दुर्निवारा दुरत्य
या ॥ मायावी सर्वशक्तीशः कालः कालकरः प्रभुः ॥ करोति कालः सकलं संहरेत्काल एव हि ॥ कालः स्थापयते विश्वं का
लाधीनमिदं जगत ॥ लब्ध्वा देवाधिदेवस्य सन्निधिं परमेष्ठिनः ॥ अनंतस्याखिलेशस्य शंभोः कालात्मनः प्रभोः ॥ प्रधा
नं पुरुषो माया माया चैवं प्रपद्यते ॥ एका सर्वगतानंता केवला निष्कला शिवा ॥ एका शक्तिः शिवैकोऽपि शक्ति

॥ कूर्म. ॥
॥ २० ॥

मायाव्यपेतः शिवः शङ्करः शक्तिमन्तो ये सर्वे शक्तिसमुद्भवाः ॥ शक्तिशक्तिमतोर्भेदं वदन्ति परमार्थतः ॥ अभेदं चानुपश्यन्ति
योगिनस्तत्त्वचिन्तकाः ॥ शक्तयो गिरिजा देवी शक्तिमन्तोथ शंकरः ॥ विशेषः कथ्यते चायं पुराणे ब्रह्मवादिभिः ॥ भोग्या विश्वे
श्वरी देवी माहेश्वरपतिव्रता ॥ प्रोच्यते भगवान्भोक्ता कपर्दी नीललोहितः ॥ मन्ता विश्वेश्वरो देवः शंकरो मन्मथान्तकः ॥ प्रोच्यते
मतिरीशानी मन्तव्या च शिवा रमा ॥ इत्येतदखिलं विप्राः शक्तिः शक्तिसमुद्भवं प्रोच्यते ॥ सर्ववेदेषु मुनिभिस्तत्त्वदर्शिभिः
एतत्प्रदर्शितं दिव्यं देव्या माहात्म्यमुत्तमं ॥ सर्ववेदान्तवादेषु निश्चितं ब्रह्मवादिभिः ॥ एकं सर्वगतं सूक्ष्मं कूटस्थमचलं ध्रुवं
योगिनस्तत्प्रपश्यन्ति महादेव्याः परं पदं ॥ आनन्दमक्षरं ब्रह्म केवलं निःकलं परं ॥ योगिनस्तत्प्रपश्यन्ति महादेव्याः प
रं पदं ॥ परात्परतरं तत्त्वं शाश्वतं शिवमच्युतं ॥ अनन्तप्रकृतौ लीनं देव्यास्तत्परमं पदं ॥ शुभं निरंजनं शुद्धं निर्गुणं द्वैतव
र्जितं ॥ आत्मोपलब्धिविषयं देव्यास्तत्परमं पदं ॥ सैषा धात्री विधात्री च परमानन्दमिच्छतां ॥ संसारतापानखिलान्निहन्तीश्व
रसंश्रयात् ॥ तस्माद्विमुक्तिमन्विच्छन्पार्वतीं परमेश्वरीं ॥ आश्रयेत्सर्वभूतानामात्मभूतां शिवात्मिकां ॥ ल
ब्ध्वा च पुत्रीं शर्वाणीं तपस्तप्त्वा सुदुश्चरं ॥ सभार्यः शरणं यातः पार्वतीं परमेश्वरीं ॥ तां दृष्ट्वा जायमानां च स्वेच्छयैव व
राननां ॥ मेना हिमवतः पत्नी प्राहेदं पर्वतेश्वरं ॥ मेनोवाच ॥ पश्य बालामिमां राजन् राजीवसदृशाननां ॥ हिताय सर्वभू
तानां जातां च तपसावयोः ॥ सोपि दृष्ट्वा ततो देवीं तरुणादित्यसन्निभां ॥ कपर्दिनीं चतुर्वक्त्रां त्रिनेत्रामतिलालसां ॥ अष्ट
हस्तां विशालाक्षीं चन्द्रावयवभूषणां ॥ निर्गुणां सगुणां साक्षात्सदसद्व्यक्तिवर्जितां ॥ प्रणम्य शिरसा भूमौ तेजसा चातिवि
ह्वलः ॥ भीतः कृताञ्जलिस्तस्याः प्रोवाच परमेश्वरीं ॥ हिमवानुवाच ॥ का त्वं देवि विशालाक्षि शशाङ्कावयवाङ्किते ॥ न

॥ राम: ॥
॥ २० ॥

२०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञाने त्वामहं वन्दे यथावन्नब्रूहि पृच्छतः। गिरीड उवाचनंकृत्वा नतः सा परमेश्वरी॥ व्याजहार महाशैलं योविनासमयप्रदा॥
श्री देव्युवाच॥ अहं विद्धि परमांशं शक्तिमहेश्वरसमाश्रयं॥ अनन्यामव्ययामेकां यां पश्यन्ति मुमुक्षवः॥ अहं वै शर्वभावानां मा
वासर्वा नरा शिवा॥ साक्ष्यनेश्वर्यविज्ञानमूर्तिः सर्वप्रवर्तिका॥ अनन्तानन्तमहिमा संसारार्णवतारणी॥ दिव्यं ददामि ते च
क्षुः पश्य मे रूपमैश्वरं॥ एतावदुक्त्वा विज्ञानं ददौ हिमवते स्वयं॥ स्वरूपं दर्शयामास दिव्यं तत्परमेश्वरं॥ कोटिसूर्यप्रतीका
शं तेजोबिम्बं निराकुलं॥ ज्वालामालासहस्राढ्यं कालानलशतोपमं॥ दंष्ट्राकरालं दुर्धर्षं जटामण्डलमण्डितं॥ त्रिशूलवरह
स्ता च घोररूपं भयानकं॥ प्रशान्तसोम्यवदनं अनन्ताश्चर्यसंयुतं॥ चन्द्रावयवलक्ष्माणं चन्द्रकोटिसमप्रभं॥ किरीटिनं गदा
हस्तं नूपुरैरुपशोभितं॥ दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनं॥ शङ्खचक्रधरं काम्यं त्रिनेत्रं कृत्तिवाससं॥ अण्डस्थं
चाण्डबाह्यस्थं बाह्यमाभ्यन्तरं परं॥ सर्वशक्तिमयं शुभ्रं सर्वाकारं सनातनं॥ ब्रह्मेन्द्रोपेन्द्रयोगीन्द्रैर्वन्द्यमानपदाम्बुजं॥
सर्वतःपाणिपादं तं सर्वतोऽक्षिशिरोमुखं॥ सर्वमावृत्य तिष्ठन्तं ददर्श परमेश्वरं॥ दृष्ट्वा तदीदृशं रूपं देव्या माहेश्वरं
परं॥ हिमवानुवाच॥ शिवो मामपरा शक्तिरनन्तानिष्कलामला॥ शान्ता माहेश्वरी॥ नित्या शाश्वता परमा क्षराऽक्षरा। विं
त्यकेवलानन्याशिवा न॥ परमात्मिका॥ अनादिरव्ययाशुद्धा देवात्मा सर्वगा चला॥ एकानेकविभागस्था मायां
तीतातिनिर्मला॥ महामाहेश्वरी सत्या महादेवी निरंजना॥ काष्ठासर्वान्तरस्था च चिच्छक्तिरतिलालसा॥ नन्दा सर्वात्मिका
विद्या ज्योतिरूपामृताक्षरा। शान्तिः प्रतिष्ठा सर्वेषां निवृत्तिरमृतप्रदा। व्योममूर्तिर्व्योमलया व्योमधाराऽच्युतामरा
अनादिनिधना मोघा कारणात्मा कुलाऽकुला। क्रतुःप्रथमजा नाभिरमृतस्यात्मसंश्रया॥ प्राणेश्वरप्रिया माता महामृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ कूर्म. ॥ योगेश्वरेश्वरी ॥ महामायासुदुःपारामूलप्रकृतिरीश्वरी । संसारयोनिः सकला सर्वशक्तिसमुद्भवा । संसारपारा दुर्वारा दुर्निरीक्ष्या
॥ २१ ॥ दुरासदा प्राणशक्तिः प्राणविद्या योगिनी परमा कला । महाभूति-दुर्धर्षा मूलप्रकृतिसंभवा । अनघेनविभवा परमाव्यापक
र्षिणी ॥ सर्गस्थित्यन्तकरणी सुदुर्वाच्या दुरत्यया । शब्दयोनिः शब्दमयी नादाख्या नादविग्रहा ॥ प्रधानपुरुषात्मिका पुराणी चिन्म
यी पुंसामादिः पुरुषरूपिणी ॥ भूतान्तरात्मा कूटस्था महापुरुषसंज्ञिता । जन्ममृत्युजरातीता सर्वशक्तिसमुद्भवा ॥ व्यापिनी
चानवच्छिन्ना प्रधानानुप्रवेशिनी ॥ क्षेत्रज्ञशक्तिरव्यक्तलक्षणा मलवर्जिता ॥ अनादिमायासंभिन्ना त्रितत्त्वा प्रकृतिर्गुहा ॥ म
हामायासमुत्पन्ना तामसी पौरुषी ध्रुवा ॥ व्यक्ताव्यक्तात्मिका कृष्णा रक्ता यांभिन्ना त्रितत्त्वा प्रकृतिर्गुहा । महामाया
समुत्पन्ना तामसी पौरुषी ध्रुवा ॥ व्यक्ताव्यक्तात्मिका कृष्णा रक्ता शुक्ला प्रसूतिका ॥ अकार्या कार्यजननी नित्यं प्रसवध
र्मिणी ॥ सर्गप्रलयनिर्मुक्ता सृष्टिस्थित्यन्तधर्मिणी ॥ ब्रह्मगर्भा चतुर्विंशा पद्मनाभाच्युतात्मिका वैद्युती शाश्वती योनि
र्जगन्मातेश्वरी प्रिया ॥ सर्वाधारा महारूपा सर्वैश्वर्यसमन्विता विश्वरूपा महागर्भा विश्वेशेच्छानुवर्तिनी ॥ महीयसी ब्रह्मयो
निर्महालक्ष्मीसमुद्भवा महाविमानमध्यस्था महानिद्रात्महेतुका ॥ सर्वसाधारणी सूक्ष्मा ह्यविद्या पारमार्थिका । अ
नन्तरूपानन्तस्था देवी पुरुषमोहिनी ॥ अनेकाकारसंस्थाना कालत्रयविवर्जिता ब्रह्मजन्मा हरेर्मूर्तिर्ब्रह्मविष्णुशिवात्मि ॥ रूपः ॥
ब्रह्मेशविश्वजननी ब्रह्माख्या ब्रह्मसंश्रया ॥ व्यक्ता प्रथमजा ब्राह्मी महती ब्रह्मरूपिणी वैराग्यैश्वर्यधर्मात्मा ब्रह्ममूर्ति ॥ २१ ॥
र्हृदिस्थिता ॥ अपां योनिः स्वयंभूतिर्मानसी तत्त्वसंभवा ईश्वराणी शर्वाणी शंकरार्धशरीरिणी ॥ भवानी चैव रुद्राणी महा
लक्ष्मीरथाम्बिका ॥ माहेश्वरी समुत्पन्ना भुक्तिमुक्तिफलप्रदा ॥ सर्वेश्वरी सर्ववन्द्या नित्यं मुदितमानसा ॥ ब्रह्मेन्द्रोपेन्द्रनमि

21

नाशंकरीश्वरवर्त्तिनी ॥ ईश्वरी राज्ञी सनातना महेश्वरपतिव्रता ॥ सकृद्विभाता सर्वार्त्तिसमुद्रपरिशोषिणी ॥ पार्वती हिमवत्पुत्री प
रमानन्ददायिनी ॥ गुणाढ्या योगजा योग्या ज्ञानमूर्त्तिर्विकाशिनी ॥ सावित्री कमला लक्ष्मीः श्रीरनन्तोरसिस्थिता ॥ सरोजनिलया गंगा
योगनिद्रासुरार्द्दिनी ॥ सरस्वती सर्वविद्या जगज्ज्येष्ठा सुमंगला ॥ वाग्देवी वरदा वाच्या कीर्त्तिः सर्वार्थसाधका ॥ वागीश्वरी ब्रह्मविद्या मह
विद्या सुशोभना ॥ गुह्यविद्यात्मविद्या च धर्मविद्यात्मभाविता ॥ स्वाहा विश्वंभरा सिद्धिः स्वधा मेधा धृतिः श्रुतिः ॥ नीतिः सुकान्तिर्मा – – – धृ
वनी रवाहिनी ॥ पूज्या विभावरी सौम्या भोगिनी भोगदा –नी ॥ शोभा शंकरी लोला मालिनी परमेष्ठिनी ॥ त्रैलोक्यसुन्दरी रम्या सुन्दरी
कामचारिणी ॥ महानुभावा सत्त्वस्था महामहिषमर्द्दिनी ॥ पद्मनाभा पापहरा विचित्रमुकुटांगदा ॥ कान्ता चित्राम्बरधरा दिव्याभ
रणभूषिता ॥ हंसाख्या व्योमनिलया जगत्सृष्टिविवर्द्धिनी ॥ निर्यन्त्रा यन्त्रमध्यस्था नन्दिनी भद्रकालिका ॥ आदित्यवर्णा कौ
वेरी मयूरवाहना ॥ वृषासनगता गौरी महाकाली सुरार्चिता ॥ अदितिर्नियता रौद्री पद्मगर्भा विवाहना ॥ विरूपाक्षा लेलि
हाना महापुरविनाशिनी ॥ महाफलानवद्यांगी कामरूपा विभावरी ॥ विचित्ररत्नमुकुटा प्रणतार्त्तिप्रभंजनी ॥ कौशिकी क
र्षणी रात्रिस्त्रिदशार्त्तिविनाशिनी ॥ बहुरूपा सुरूपा च विरूपा रूपवर्जिता ॥ भक्तार्त्तिशमनी भव्या भवभावविनाशिनी ॥
निर्गुणा नित्यविभवा निःसारा निरपत्रपा ॥ तपस्विनी सामगीतिर्भवांकनिलयालया ॥ दीक्षा विद्याधरी दीप्ता महेन्द्रविनि
पातिनी ॥ सर्वातिशायिनी विद्या सर्वसिद्धिप्रदायिनी ॥ सर्वेश्वरप्रिया तार्क्ष्या समुद्रान्तरवासिनी ॥ अकलंका निराधारा
नित्यसिद्धा निरामया ॥ कामधेनुर्वृहद्गर्भा धीमती मोह–नाशिनी ॥ निःसंकल्पा निरातंका विनया विनयप्रिया ॥ ज्वालामाला
सहस्राढ्या देवदेवी मनोन्मनी ॥ महाभगवती भर्गा वासुदेवसमुद्भवा ॥ महेन्द्रोपेन्द्रभगिनी भक्तिगम्या परावरा ॥ ज्ञानज्ञेयाज

कूर्म. ॥ ॥२२॥

नावेदतत्त्वविद्यायागतिः ॥ दक्षिणा दहना दग्धी सर्वभूतनमस्कृता योगमाया विभागज्ञा महामोहा गरीयसी ॥ संध्या सर्वसमुद्भूति ब्रह्म
वृक्षाश्रयादितिः ॥ बीजांकुरसमुद्भूति महाशक्ति महामतिः ॥ ख्यातिः प्रज्ञावितिः संविन्महाभोगीन्द्रशायिनी ॥ विकृतिः शांकरी शा
स्त्रि गंगागंधर्वसेविता ॥ वैश्वानरी महाशाला महासेनागुहप्रिया ॥ महारात्रिः शिवानंदा शचीदुःस्वप्ननाशिनी ॥ इज्या पूज्या ज
गद्धात्री दुर्विज्ञेया सुरूपिणी ॥ गुहांविका गुणोत्पत्ति महापीठा मरुत्सुता ॥ हव्यवाहांतरागादि हव्यवाहसमुद्भवा ॥ जगद्योनि जग
न्माता जन्ममृत्युजरातिगा ॥ बुद्धिमाता बुद्धिमती पुरुषांतरवासिनी ॥ तरस्विनी समाधिस्था त्रिनेत्रा दिवि संस्थिता ॥ सर्वेन्द्रि
योपगम्या माता सर्वभूतहृदिस्थिता ॥ संसारतारिणी विद्या ब्रह्मवादिमनोलया ॥ ब्रह्माणी बृहती ब्राह्मी ब्रह्मभूता भवारणी
हिरण्मयी महारात्रिः संसारपरिवर्त्तिका ॥ सुमालिनी सुरूपा च भाविनी तारिणी प्रभा ॥ उन्मीलनी सर्वसहा सर्वप्रत्ययसाक्षि
णी ॥ सुसौम्या चंद्रवदना तांडवासक्तमानसा ॥ सत्वशुद्धिकरी शुद्धिर्मलत्रयविनाशिनी — जगत्प्रिया जगन्मूर्त्ति त्रिमूर्त्ति
रमृता श्रया ॥ निराश्रया निराहारा निरंकुशपदोद्भवा ॥ चंद्रहस्ता विचित्रांगी स्रग्विणी पद्मधारिणी ॥ परावरविधानज्ञा म
हापुरुषपूर्वजा ॥ विश्वेश्वरप्रिया विद्युत् विद्युज्जिह्वा जितश्रमा ॥ विद्यामयी सहस्राक्षी सहस्रवदनात्मजा ॥ सहस्ररश्मि ॥राम॥
ः सत्वस्था महेश्वरपदाश्रया ॥ क्षालिनी सन्मयी व्याप्ता तैजसी पद्मबोधिका ॥ महामायाश्रया मान्या महादेवमनोरमा ॥२२॥
व्योमलक्ष्मी सिंहरथा ॥ चिकिता नाम मनाना नित त्रिनयना भार्गी रेश्वरी विमानस्था विशोकनाशिनी ॥ अनाहता कुंडलीनी
पद्मवासिना ॥ सदानंदा सदाकीर्त्तिः ज्ञानशक्तिः परागतिः ॥ क्षोभिका बंधिका भेद्या भेदाभेदविवर्जिता ॥ अभिन्नाभि
न्नसंस्थाना वंशिनी वंशहारिणी ॥ गुह्यशक्तिर्गुणातीता सर्वदा सर्वतोमुखी भगिनी भगवत्पत्नी सकला कालहारिणी ॥ स

22

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्वे विन्सर्वतोभद्रा गुह्या गूढगुह्यारणी॥ प्रकृत्या योगमाया च गंगा विश्वेश्वरेश्वरी॥ कलिला कपिला कान्ता कमलाभा कलान्तरा॥
पुण्यपावकरी गीर्भो कपर्दिपुरःसरा॥ पोषणी परमैश्वर्यं भूतिदा भूतिभूषणा॥ पंचब्रह्मसमुत्पत्तिः परमार्थार्थविग्रहा॥ ध
र्मोदया भानुमती योगिज्ञेया मनोजवा॥ मनोरमा मनोरक्ता तापसी वेदरूपिणी॥ वेदशक्ति वेदमाता वेदविद्याप्रकाशिनी॥ वा
गीश्वरेश्वरी माला महाशक्तिर्मनोमयी॥ विश्वावस्था वियन्मूर्त्ति विद्युन्माला विहायसी॥ किंनरी सुरभी विद्यानन्दिनी नन्दवर्द्ध
ना॥ भारती परमानन्दा परापरविभेदिका॥ सर्वप्रहरणोपेता काम्या कामेश्वरेश्वरी॥ अचिन्त्यानन्तविभवा हृल्लेखा कनकप्र
भा॥ कूष्माण्डी धनरत्नाढ्या सुगन्धा गन्धदायिनी॥ त्रिविक्रमपदोद्भूता धनुष्पाणिः शिवोदया॥ सुदुर्लभा धनाध्यक्षा धन्या पिं
गललोचना॥ शान्तिः प्रभावती दीप्तिः पंकजायतलोचना॥ आद्या हृत्कमलोद्भूता गवां माता रणप्रिया॥ सत्क्रिया गिरिजा शु
द्धा नित्यपुष्टा निरन्तरा॥ दुर्गा कात्यायनी चंडी चर्चिका शान्तविग्रहा॥ हिरण्यवर्णा जगती जगद्यंत्रप्रवर्त्तिका॥ मंद
राद्रिनिवासा च रक्तवर्णा मालिनी॥ रत्नमाला रत्नगर्भा पृथ्वी विश्वप्रमाथिनी॥ पद्मनाभा पद्मनिभा नित्यतुष्टामृतोद्भ
व॥ धुन्वती दुःप्रकंपा च सूर्यमाता दृषद्वती॥ महेन्द्रभगिनी सौम्या वरेण्या वरदायिनी॥ कल्याणी कमलावासा पंचचूडा वरप्रदा
वाच्या वरेश्वरी विद्या दुर्जया दुरतिक्रमा॥ कालरात्री महावेगा वीरभद्रप्रिया हिता भद्रकाली जगन्माता भक्तानां भद्रदायि
नी॥ कराला पिंगलाकामसकामभेदमहर्विन॥ यशस्विनी यशोदा च षडध्वपरिवर्तिका॥ शंखिनी पद्मिनी सांख्या सांख्ययो
गप्रवर्तिका॥ चैत्रा संवत्सरारूढा जगत्संपूरणी ध्वजा॥ शुम्भारी खेचरी स्वस्था कंबुग्रीवा कलिप्रिया॥ खगध्वजा खगारूढा
महद्भगमालिनी॥ ऐश्वर्यपद्मिनी लया विरक्ता गरुडासना॥ जयन्ती भगमस्यथा —— ग करे स्मरागा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ कूर्म॰ ॥ रीसंकल्पसिद्धा साम्यस्था सर्वविज्ञानदायिनी ॥ कलिकल्मषविहंत्री च गुह्योपनिषदुत्तमा ॥ नित्यदृष्टिस्मृतिव्याप्तिपुष्टि
॥ २३ ॥ ः स्तुष्टिक्रियावती ॥ विश्वामरेश्वरेशाना भुक्तिर्मुक्तिः शिवामृता ॥ लोहिता सर्पमाला च भीषणी वनमालिनी ॥ अनंतशयनानं
ता नरनारायणोद्भवा ॥ नृसिंही दैत्यमथनी शंखचक्रगदाधरा ॥ संकर्षणी समुत्पत्तिरंबिकापादसंश्रया ॥ महाज्वाला महामूर्त्तिः सु
मूर्त्तिः सर्वकामधुक् ॥ शुभा चरुस्तना सौरी धर्मकामार्थमोक्षदा ॥ भ्रूमध्यनिलया पूर्वा पुराणपुरुषारणिः ॥ महाविभू
तिदा मध्या सरोजनयना समा ॥ अष्टादशभुजानाद्या नीलोत्पलदलप्रभा ॥ सर्वशक्त्यासनारूढा धर्माधर्मविवर्जिता ॥ वैरा
ग्यज्ञाननिरता निरालोका निरिंद्रिया ॥ विचित्रगहनाधारा शाश्वतस्थानवासिनी ॥ स्थानेश्वरी निरानंदा त्रिशूलवरधारिणी
अशेषदेवतामूर्तिर्देवता वरदेवता ॥ गणांबिका गिरेः पुत्री निशुंभविनिपातिनी ॥ अवर्णा वर्णरहिता निर्वर्णा बीज
संभवा ॥ अनंतवर्णानन्यस्था शंकरी शांतमानसा ॥ अगोत्रा गोमती गोप्त्री गुह्यरूपा गुणोत्तरा ॥ गौर्गीर्गव्यप्रिया गौणी ग
णेश्वरनमस्कृता ॥ सत्यमात्रा सत्यसंधा त्रिसंध्या संधिवर्जिता ॥ सर्ववादाश्रया सांख्या सांख्ययोगसमुद्भवा ॥ अ
संख्येयाप्रमेयाख्या शून्या शुद्धकुलोद्भवा ॥ बिंदुनादसमुत्पत्तिः शंभुवामा शशिप्रभा ॥ पिशंगा भेदरहिता मनोज्ञा मधुसू
दनी ॥ महाश्रीः श्रीसमुत्पत्तिस्तमःपारे प्रतिष्ठिता ॥ त्रितत्त्वमाता त्रिविधा सुसूक्ष्मपदसंश्रया ॥ शांतातीताम ॥ रत्न॰ ॥
लातीता निर्विकारा शिवाश्रया ॥ शिवाख्या चित्तनिलया शिवज्ञानस्वरूपिणी ॥ दैत्यदानवनिर्मात्री काश्यपी काल ॥ २३ ॥
कल्पिका ॥ शास्त्रयोनिः क्रियामूर्त्तिश्चतुर्वर्गप्रदर्शिका ॥ नारायणी नरोत्पत्तिः कौमुदी लिंगधारिणी ॥ कामुकी
ललिता भावा परापरविभूतिदा ॥ परांतजातमहिमा बडवा ॥ वामलोचना सुभद्रा देवकी सीता वेदवेदांगपारगा

23

मनश्चिनामनुमाता महामन्युसमुद्भव ॥ अमन्युरमता स्वाहा पुरुहूता पुरुष्टुता ॥ अशोच्याभिन्नविषयापाहिताप
जनपद ॥ हिरण्यरजनी हेमाभरणाभूषित ॥ विभ्राजमाना दुर्गोकाज्योतिष्टोमफलप्रदा ॥ महानिद्रासमुद्भूति निद्रास
त्यदेवता ॥ दीर्घाककुद्मिनी हृद्या शान्तिदा शान्तिवर्द्धनी ॥ लक्ष्म्यादिशक्तिजननी शक्तिचक्रप्रवर्त्तिका ॥ त्रिशक्तिजननी
जन्याषडूर्मिपरिवर्जिता ॥ सुधौता कर्मकरणीयुगान्तदहनात्मिका संकर्षणीजगद्धात्री कामयोनिः किरीटिनी ॥ ऐन्द्री त्रै
लोक्यनमिता वैष्णवी परमेश्वरी ॥ प्रद्युम्नदयिता दात्री युग्मदृष्टिस्त्रिलोचना ॥ मदोत्कटा हंसगतिः प्रचण्डचण्डविक्रमा ॥ वृषा
वेशा वियन्माता विन्ध्यपर्वतवासिनी ॥ हिमवन्मेरुनिलया कैलासगिरिवासिनी ॥ चाणूरहन्तृतनया नीतिज्ञा कामरूपि
णी ॥ वेदविद्याव्रतस्नाता धर्मशीला निरासनी ॥ वीरभद्रप्रजा वीरा महाकामसमुद्भवा ॥ विद्याधरप्रियासिद्धा विद्याधर
निराकृतिः ॥ आप्यायनी हरन्ती च पावनी पोषणी कला ॥ मातृका मन्मथोद्भूता वारिजा वाहनप्रिया ॥ करीषिणी सुधावा
णी वीणावादनतत्परा ॥ सेविता सेविका सेव्या सिनीवाली गरुत्मती ॥ अरुन्धती हिरण्याक्षी मृगाङ्का मानदायिनी ॥ वसुप्र
दा वसुमती वसोर्द्धारा वसुन्धरा ॥ धाराधरा वरारोहा वरावाससहस्रदा ॥ श्रीफला श्रीमती श्रीशा श्रीनिवासा ॥ शिवप्रि
या ॥ श्रीधरा श्रीकरी कल्याणी धरार्द्धशरीरिणी ॥ अनन्तदृष्टिरक्षुद्रा धात्रीशा धनदप्रिय ॥ निहन्त्री दैत्यसंघानां
सिंहिका सिंहवाहना ॥ सुवर्चलाहंच सुश्रोणी सुकीर्त्तिः छिन्नसंशय ॥ रसज्ञा रसदा रामा लेलिहानामृतस्रवा ॥ नित्यो

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दित्या स्वयंज्योतिरात्मका ममसंजीवनी ॥ वज्रेश्वरी वज्रजिह्वा वैदेही वज्रविग्रहा ॥ मंगल्या मंगला माला मलिना मलहारिणी ॥
गान्धर्वी गारुडी चान्द्री कंबलाश्वतरप्रिया ॥ सौदामिनी जनानन्दा भ्रकुटी कुटिलानना ॥ कर्णिकारकरा कक्ष्या कंसप्राणापहारि
णी ॥ युगंधरा युगावर्त्ता त्रिसंध्या हर्षवर्द्धनी ॥ प्रत्यक्षदेवता दिव्या दिव्यगंधा दिवः परा ॥ शक्रासनगता शाक्री साध्या चारुश
रासना ॥ इष्टा विशिष्टा शिष्टेष्टा शिष्टाशिष्टप्रपूजिता ॥ शतरूपा शतावर्त्ता विनीता सुरभिः सुरा ॥ सुरेन्द्रमाता सुद्युम्ना सु
षुम्ना सूर्यसंस्थिता ॥ समीक्ष्या सत्प्रतिष्ठा च निवृत्तिर्ज्ञानपारगा ॥ धर्मशास्त्रार्थकुशला धर्मज्ञा धर्मवाहना ॥ धर्माधर्मविनि
र्मात्री धार्मिकाणां शिवप्रदा ॥ धर्मशक्तिर्धर्ममयी विधर्मा विश्वधर्मिणी ॥ धर्मान्तरा धर्ममया धर्मपूर्वा धनावहा ॥ धर्मोप
देष्ट्री धर्मात्मा धर्मगम्या धराधरा ॥ कपाली शकला मूर्त्तिः कला कलितविग्रहा ॥ सर्वशक्तिविनिर्मुक्ता सर्वशक्त्याश्रयाश्र
या ॥ सर्वा सर्वेश्वरी सूक्ष्मा सूक्ष्मज्ञानस्वरूपिणी ॥ प्रधानपुरुषेशेशा महादेवैकसाक्षिणी ॥ सदाशिवा वियन्मूर्त्तिर्वेद
मूर्त्तिरमूर्त्तिका ॥ एवं नाम्नां सहस्रेण स्तुत्वासौ हिमवान्गिरिः ॥ भूयः प्रणम्य भीतात्मा प्रोवाचेदं कृताञ्जलिः ॥ यदेतदैश्वरं रू
पं घोरं ते परमेश्वरि ॥ भीतोस्मि सांप्रतं दृष्ट्वा रूपमन्यत्प्रदर्शय ॥ एवमुक्ताथ सा देवी तेन शैलेन पार्वती ॥ संहृत्य दर्श
यामास स्वरूपमपरं पुनः ॥ नीलोत्पलदलप्रख्यं नीलोत्पलसुगंधिकं ॥ द्विनेत्रं द्विभुजं सौम्यं नीलालकविभूषितं ॥ रक्तपादा
म्बुजतलं सुरक्तकरपल्लवं ॥ श्रीमद्विशालसंवृत्तललाटतिलकोज्ज्वलं ॥ भूषितं चारुसर्वाङ्गं भूषणैरतिकोमलं ॥ उरसि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नंभुविंवोष्ठनूपुरारवसंयुतं । प्रसन्नवदनं दिव्यमनंतमहिमास्पद ॥ तदीदृशं समालोक्य स्वरूपं शैलसत्तमः । भीतिसंत्यस्तहृष्टात्मा
वभाषे परमेश्वरी ॥ हिमवानुवाच ॥ अद्य मे सफलं जन्म अद्य मे सफलं तप ॥ यन्मोसाक्षात्त्वमव्यक्ताप्रसन्नादृष्टिगोचरं ॥ त्वया सृ
ष्टं जगत्सर्वं प्रधानाद्यं त्वयि स्थितं । त्वय्येव लीयते देवि त्वमेव परमा गतिः ॥ वदंति केचित्त्वामेव प्रकृतिं प्रकृतेः परां ॥ अपरे
परमार्थज्ञाः शिवेति शिवसंश्रयात् ॥ त्वयि प्रधानं पुरुषो महान्ब्रह्म तथेश्वरः ॥ अविद्यानियतिर्मायाकलाद्याः शतशोभवन् ॥
हि त्वं हि सा परमा शक्तिरनंता परमे–नी ॥ सर्वभेदविनिर्मुक्ता सर्वभेदाश्रयाश्रया ॥ त्वामधिष्ठाय योगेशि महादेवो महेश्वरः ॥
प्रधानाद्यं जगत्सर्वं करोति विकरोति च । त्वामेव संगतो देवः स्वमानंदं समश्नुते ॥ त्वमेव परमानंदः । त्वमेवानंददायिनी । त्वम
क्षरं व्योम महज्ज्योतिर्निरंजनं ॥ शिवं सर्वगतं सूक्ष्मं परं ब्रह्म सनातनं । त्वं शक्रः सर्वदेवानां ब्रह्मा ब्रह्मविदामसि ॥ वायुर्बलव
तां देवि योगिनां त्वं कुमारसनत् ॥ ऋषीणां च वशिष्ठस्त्वं व्यासो वेदविदामसि ॥ सांख्यानां कपिलो देवो रुद्राणामसि शंकरः । आ
दित्यानामुपेंद्रस्त्वं वसूनां चैव पावकः ॥ वेदानां सामवेदस्त्वं गायत्री छंदसामपि ॥ अध्यात्मविद्या विद्यानां गतीनां परमा गतिः
माया त्वं सर्वशक्तीनां कालः कलयतामसि ॥ ॐकारः सर्वगुह्यानां वर्णानां च द्विजोत्तमः ॥ आश्रमाणां गृहस्थस्त्वं ईश्वराणां म
हेश्वरः । पुंसां त्वमेकः पुरुषः सर्वभूतहृदिस्थितः ॥ सर्वोपनिषदां देवि गुह्योपनिषदुच्यते ॥ ईशानश्चासि कल्पानां युगानां कृतमे
व च ॥ आदित्यः सर्वमार्गाणां वाचां देवी सरस्वती ॥ त्वं लक्ष्मीश्चारुरूपाणां विष्णुर्मायाविनामसि ॥ अरुंधती सतीनां त्वं सु
पर्णः पततामसि ॥ सूक्तानां पौरुषं सूक्तं ज्येष्ठसाम च सामसु ॥ सावित्री चासि जाप्यानां यजुषां शतरुद्रियं ॥ पर्वतानां महामे
रुरनंतो भोगिनामसि ॥ सर्वेषां त्वं परं ब्रह्म त्वन्मयं सर्वमेव हि ॥ रूपं तवाशेषकलाविहीनमगोचरं निर्मलमेकरूपं ॥ अना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कूर्म· ॥ दिपर्यन्तं नमन्तं नमाद्यं नमामि सत्यं तमसः परस्तात् ॥ पदेव परस्पं निजगन्महन्निवेद्यं नवितान्तविनिश्चितार्थं ॥ आनन्दमात्रं प्रणवा
२५ ॥ भिधानं नवदेवरूपं शरणं प्रपद्ये ॥ अशेषभूतीनरसे विविहं प्रधानपुंयोगहेतु ॥ नेतोमयं तम्य विनाशहीनं प्राणाभिधानं प्रण
तोस्मि रूपं ॥ आद्यं तहीनं जगतात्मरूपं विभिन्नसंस्थं प्रकृतेः परस्तात् ॥ कूटस्थमव्यक्तकपुरस्थं वनासिपुरुषं भिधानं ॥ सर्व
श्रयं सर्वजगद्विधाने सर्वत्रगं तम्य विनाशहीनं नाशहीनं ॥ सूक्ष्मं विविक्तं गुणप्रधानं नमोस्मि रूपमनन्यभेदं ॥ आद्यं महत्
तं पुरुषात्मरूपं प्रकृत्यवस्थं त्रिगुणात्मबीजं ॥ ऐश्वर्यविज्ञानविरोधधर्मैः समन्वितं देवि नमोस्मि रूपं ॥ द्विःसप्तलोकात्मकम
म्बुसंस्थं विचित्रभेदं पुरुषैकनाथं ॥ अनेकभेदैरभिधासिनं तं नमोस्मि रूपं जगदण्डसंस्थं ॥ अशेषवेदात्मकमेकमाद्यं स्वतेज
सा पूरितलोकभेदं ॥ त्रिकालहेतुं परमेष्ठिसंज्ञं नमामि रूपं रविमण्डलस्थं ॥ सहस्रमूर्द्धानमनन्तशक्तिं सहस्रबाहुं पुरुषं पुरा
णं ॥ शयानमन्तः सलिले तथैव नारायणाख्यं प्रणतोस्मि रूपं ॥ दंष्ट्राकरालं त्रिदशाभिवन्द्यं युगान्तकालानलकल्परूपं ॥
अशेषभूताण्डविनाशहेतुं नमामि रूपं तव कालसंज्ञं ॥ फणासहस्रेण विराजमानं भोगीन्द्रमुख्यैरपि पूज्यमानं ॥ जनार्दनाख्य
ढं तनुं प्रपन्नं नमोस्मि रूपं तव शेषसंज्ञं ॥ पहीनयोकप्रविहीनरूपं सुरासुरैरर्चितपादपद्मं ॥ सुकोमलं देवि विभासि शुभ्रं न
पामि नेत्रूपमिदं भवानि ॥ श्रीः ॐ नमस्ते महादेवि नमस्ते परमेश्वरि ॥ नमो भगवती शान्तिरिति वायैर्नमो नमः ॥ ब्रह्मकोटि ॥ लघुः ॥
त्वद्गधारे त्वमेव गतिर्मम ॥ त्वमेव शरणं यासि प्रसीद परमेश्वरी ॥ मया नालि सपो लोके देवो वा देवतोपि वा ॥ भूता मा ॥ २५ ॥
वैवसृष्टी संभूतां परमापतः ॥ एकानवं विवेके देवि किलाभून्दिनकन्यका ॥ मेनाद्दोष जगन्माता हेमपुत्रपे गोरवं ॥ पाहिमा
मेरेशानि त्वमेव पाससर्वदा ॥ नमामि तव पादाब्जं ब्रजामि शरणं शिवं ॥ महोमे भुमहडाग्यं महादेवी समागमात ॥ माता पव

25

महोदेवि किं करिष्यामि शंकरि ॥ एतावदुक्त्वा वचनं तदा हिमगिरीश्वरः ॥ संप्रेक्ष्य मातरो गिरिजां प्रांजलिः पार्श्वगो भवान् ॥ श्रवणार्त
स्याद्वचनं निःशक्यं नगनायकः ॥ समन्वितं प्राह पितरं स्वत्वां पशुपतिं पतिं ॥ ॥श्रीदेव्युवाच॥ शृणु चैतन्मत्प्यम्भगृहमीश्वरेश्वे
वरं यदेशं गिरिश्रेष्ठ सेवितं ब्रह्मवादिभिः ॥ यं न्ये साक्षात्परं रूपं मैश्वरं दुष्टमद्भुतं ॥ सर्वं शक्तिसमायुक्तमनंतं प्रेरकं परं ॥ शांतः
समाहितमना भूत्वा मानहंकारवर्जितः ॥ तन्निष्ठस्तत्परो भूत्वा तदेव शरणं व्रजेत् स्यात्तनन्यया ॥ नान्यपंसां वंदमाश्रितः ॥ सर्वभूत
नयो त्तने ल देवार्वं पतर्व्वदा ॥ त्वदेव मनसा पश्यन्‌ ध्यायन्‌ यजन्‌ स्व मान नम ॥ मत्पोपदेशात्संसारं नाशायामि न वानय ॥ अहं त्व
परया शक्त्या पेश्वर्यं योगमास्थितं ॥ संसारसागरात्स्मादुद्धराम्यचिरेण तु ॥ ध्यानेन कर्मयोगेन भक्त्या ज्ञानेन चापैव हि ॥ प्राप्याहं ते
गिरिश्रेष्ठ नान्यथा कर्मकोटिभिः ॥ श्रुतिस्मृत्युदितं सम्यक्कर्मवर्णाश्रमात्मकं ॥ अध्यात्मज्ञानसहितं मुक्तये सततं कुरु ॥
धर्मात्संजायते भक्तिर्भक्त्या संप्राप्यते परं ॥ श्रुतिस्मृतिभ्यामुदितो धर्मो यज्ञादिको मतः ॥ नान्यतो जायते धर्मो वेदाद्धर्मो
हि निर्वभौ ॥ तस्मान्मुमुक्षुर्धर्मार्थी मद्रूपं वेदमाश्रयेत ॥ ममैवैषा परा शक्तिर्वेदसंज्ञा पुरातनी ॥ ऋग्यजुःसामरूपेण स
र्गादौ संप्रवर्तते ॥ तेषामेव च गुप्त्यर्थं वेदानां भगवानजः ॥ ब्राह्मणादीन्ससर्जाथ स्वे स्वे कर्मण्ययोजयत् ॥ येन कुर्वन्ति न
दर्थं ब्रह्मनिर्मितान् ॥ तेषां मधस्तान्नरकान् मिथ्यादीन कल्पयेत ॥ नच देवादृते किंचिच्छास्त्रं धर्माभिधायकं ॥ योन्यत्र रमते
सोसौ नहंभाष्यो द्विजातिभिः ॥ यानि शास्त्राणि दृश्यंते लोकेस्मिन्विविधानि तु ॥ श्रुतिस्मृतिविरुद्धानि निष्ठा तेषां हि तामसी ॥
कापालं पंचरात्रं च यामलं वाममार्हतं ॥ एवंविधानि चान्यानि मोहनार्थानि तानि तु ॥ ये कुशास्त्राभियोगेन मोहयंतीह मानवा
न् ॥ मया सृष्टानि शास्त्राणि मोहायेषां भवान्तरे ॥ वेदार्थवित्तमैः कार्यं यत्स्मृतं कर्म वैदिकं ॥ तत्प्रयत्नेन कुर्वन्ति मत्प्रिय

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तेहि ध्येनरः ॥ वरुणानामतत्कंपार्थं मन्त्रियोगाद्दिशःस्तवं ॥ स्वायंभुवो मनुर्द्देवो मुनीनां पूर्व्वमुक्तवान् ॥ अन्ताराम्बेपितृतयकं तन्मु
स्वात्र्छमधुत्रमं ॥ वक्तुं देवं प्रतिष्ठार्थं धर्मशास्त्राणि वै वहि ॥ तेषु वा नर्हि तेषु वं युगं तेषु मन्वन्तरेषु च ॥ ब्रह्मणो वचनान्नानि कल्पे
निवृगे युगे ॥ अष्टादशपुराणानि व्यासाद्यैः कथितानि तु ॥ युगे युगे तु सर्वेषां कर्ता वै धर्मशास्त्रवित् ॥ शिक्षाकल्पो व्याकरणं
निरुक्तं छन्दएवच ॥ ज्योतिशास्त्रं न्यायविद्या विद्या सर्वेषामुपबृंहणां ॥ एवं चतुर्दशैतानि तथाहि द्विजसत्तमाः ॥ चतुर्वेदे मयोक्ता
निधर्मो नान्यत्र विद्यते ॥ एवं ये नामहं धर्मं मनुव्यासादय । परं व्योपपत्तिममादेशाद्यावदाभूतसंप्लवं ॥ ब्रह्मणः सहते सर्वे
संप्राप्ते प्रतिसंचरे ॥ परस्यांतेः कृतात्मानः प्रविशंति परं पदं ॥ तस्मात्सर्वं प्रयत्नेन धर्मार्थं वेदमाश्रयेत् ॥ धर्मेणा सहितं ता
नं परब्रह्मप्रकाशयेत् ॥ येतु संगान्परित्यज्य मामेव शरणं गताः ॥ उपासते न पश्यन्ति योगमैश्वरमास्थिताः ॥ सर्वभूतदय
वंतः शांता दांता विमत्सराः ॥ अमानिनो बुद्धिमंतः ॥ तापसाः संशितव्रताः ॥ मच्चित्ता मद्गतप्राणा मज्ज्ञानकथने रताः ॥ सन्या
सिनो गृहस्थाश्च वनस्था ब्रह्मचारिणः ॥ तेषां नित्याभियुक्तानां मायातत्त्वसमुत्थितं ॥ नाशयामि तमः कृत्स्नं ज्ञानदीपेन नो
चिरात् ॥ ते सुनिर्धूतमनसो ज्ञानेनैकेन मन्मया ॥ सन्यन्तं दालसंसारे न जायन्ते पुनः पुनः ॥ तस्मात्सर्वप्रकारेण मद्भक्तो मत्पराय ॥ रामः ॥
राः ॥ मामेवार्चय सर्वत्र मनसा शरणं गतः ॥ अशक्तौ यदि मे ध्यातुमैश्वरं रूपमव्ययं ॥ ततो मे परमं रूपं कलाद्यं शरणं व्रज ॥ २६ ॥
य. यत् तत्स्वरूपमपि ज्ञानमनसो गोचरं न च ॥ न त्रिस्तत्परोभवान दर्थनपतेभव ॥ प्रकृतिं निष्कलं तत्रूपं चिन्मात्रं केवलं शि
वं सर्वोपाधिविनिर्मुक्तमनंतममृतं परं ॥ ज्ञानेनैकेन तल्लभ्यं क्लेशेन परमं पदं ॥ ज्ञानमेव प्रपश्यंतो मामेव प्रविशंति ते
तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ॥ गच्छंत्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥ मामनाश्रित्य परमं निर्वाणममु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ष्कलं ध्रुवं ॥ प्राप्यते न हि राजेंद्र नमो मां शरणं व्रज ॥ एकेनैव न पृथक्त्वेन तथा वो भय यथापि वा ॥ मामुपास्य महीपाल नतो याम्यखा
सि नत्यं दं ॥ मा मनाश्रित्य नन्तं स्वभाव विमलं शिवं ॥ प्राप्यते न हि राजेंद्र नमो मां शरणं व्रज ॥ नन्या — मक्षरं रूपं मित्येवं ता
ता मैश्वरं ॥ आराध्य प्रयत्नेन नतो ऽध त्वं प्रहास्यसि ॥ कर्मणा मनसा वाचा शिवं सर्वं सर्वदा ॥ मभ्यर्चयभावेन नतो जास्यसि
नत्यदं ॥ नवै पश्यंति देवेश मोहिता मम मायया ॥ अनाद्यं नत्पं परमं महेश्वरं सजं शिवं ॥ सर्वभूतात्मभूतस्थं सर्वाधारं निरं
जनं ॥ निष्कलं देवं निराभासं निर्गुणं तमसः परं ॥ अहं नमव्यक्तं ब्रह्मतिः कलं निःप्रपंचकं ॥ त्वलं वैद्य मं वे शंनत्यरं यो गिप्रिय
स्थितं ॥ स्वस्थैराणां मम मानित्यं वेष्टितं मम मायया ॥ संसारसागरे ज्ञापैते चतुर्नः पुनः ॥ भक्त्या त्वनन्यया राजन्नूलम्य
कृतामेव देवहि ॥ अधिष्ठं व्यंहितं ब्रह्मजन्यवंधनि हन्तये ॥ अहंकारं च मात्सर्यं कामक्रोधपरिग्रहं ॥ अधर्मा भिनिवेशं च त्य
क्त्वा वैराग्यमास्थितः ॥ सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ॥ अवीक्ष्य चात्मनात्मानं ब्रह्मभूयाय कल्पते ॥ ब्रह्मभूतः प्र
सन्नात्मा सर्वभूताभयप्रदः ॥ ऐश्वर्यं परमं भक्तिं विदेता नन्यभाविनि ॥ वीक्ष्यते तत्परं तत्वमैश्वरं ब्रह्म निष्कलं ॥ सर्वसं
सारनिर्मुक्तो ब्रह्मण्येवावतिष्ठते ॥ ब्रह्मणो येप्रतिष्ठायां परस्य परमः शिव ॥ अनन्यश्चाव्ययश्चैक आत्माधारो महेश्वरः
ज्ञानेन कर्मयोगेन भक्त्या योगेन वा नृप ॥ सर्वसंसारमुक्त्यर्थमीश्वरं शरणं व्रज ॥ परमं गुह्योपदेशाभिमपादत्तो गिरीश्व
र ॥ अवीक्ष्यते न दद्विन्त्यं यथेष्टं कर्तुमर्हसि ॥ अहं वै याचितो देवैः संजातो परमेश्वरात ॥ विनिंदितं पितरमे महेश्वरविनि
वकं ॥ धर्मसंस्थापनार्थाय तव राधनकारणात ॥ मेनादेह समुत्पन्ना त्वामेव पितरश्रिता ॥ सत्वं नियोगाद्देवस्य
ब्रह्मणः परमात्मनः ॥ प्रदास्यसे मां रुद्राय स्वयंवरसमागमे ॥ तत्सर्वं विधास्येत नरेश जानात् सर्वदेवाः सवादवाः ॥ त्वां

कूर्म. ॥ तपस्तप्ति देवतानां प्रसीदति वशंकरः ॥ तस्मात्सर्वप्रयत्नेन मा विधिज्ञाणो वरं ॥ संपूज्य देवमीशानं शरण्यं शरणं व्रज ॥ स एव ब्रु
२७ ॥ ह्मो हिमवान् देवो देवीं देव्या गिरीश्वरः ॥ प्रणम्य शिरसा देवीं प्राञ्जलिः पुनरब्रवीत् ॥ विस्तरेण महेशानि योगं माहेश्वरं परं
ज्ञानं चैवात्मनो योगं साधनानि च विस्तरात् ॥ निशम्य वदनांभोजान् गिरीन्द्रो लोकपूजितः ॥ लोकमातुः परं ज्ञानं
योगयुक्तो भवत्पुनः ॥ प्रददौ चा महेशाय पार्वती भाग्यगौरवान् ॥ नियोगाद् ब्रह्मणः सोऽथ देवानां चैव संनिधौ । य इदं पठ
तेऽध्यायं देव्या माहात्म्यकीर्तनं ॥ शिवस्य संनिधौ भक्त्या शुचिस्तद्भावभाविताः ॥ सर्वपापविनिर्मुक्तो दिव्ययोगसमन्वि
तः । उल्लंघ्य ब्रह्मणो लोकं देव्याः स्थानमवाप्नुयात् ॥ यश्चैतत् पठते स्तोत्रं ब्राह्मणानां समीपतः ॥ समाहितमनाः सोऽपि
सर्वैः पापैः प्रमुच्यते ॥ नाम्नामष्टसहस्रं तु देव्या यत्समुदीरितं ॥ ज्ञात्वार्कमंडलगतां संभाव्य परमेश्वरीं ॥ अभ्यर्च्य गंध
पुष्पाद्यैर्भक्तियोगसमन्वितः ॥ संस्मरन् परमं भावं देव्या माहेश्वरं परं अनन्यमानसो नित्यं जपेदामरणाद् द्विजः
सोऽन्तकाले स्मृतिं लब्ध्वा परं ब्रह्माधिगच्छति ॥ अथवा जायते विप्रो ब्राह्मणानां शुचे कुले सर्वसंस्कारमाहात्म्याद् ब्र
विद्यामवाप्स्यति ॥ संप्राप्य योगं परमं दिव्यं तत्पारमेश्वरं ॥ शान्तः सुसंयतो भूत्वा शिवं सायुज्यमाप्नुयात ॥ प्रत्येकं चा ॥राम.॥
प्यथ नामानि जुहुयात् कुसुमात्रयं ॥ महापातकमातिकृतैर्दोषैर्ग्रहदोषैः प्रमुच्यते जपेद्वाहरहर्नित्यं संवत्सरमतंद्रितः ॥ श्री ॥ २७ ॥
कामः श्री कामः पार्वतीं देवीं पूजयित्वा विधानतः ॥ संपूज्य पक्षान्ते तत्सम्यग् विनेत्रं भक्तिसंयुतः ॥ लभते महतीं लक्ष्मी
महादेवप्रसादतः ॥ तस्मात्सर्वप्रयत्नेन जप्तव्यं हि द्विजातिभिः ॥ सर्वपापापनोदार्थं देव्या नामसहस्रकं ॥ सूत उवाच
प्रसंगात्कथितं विप्रा देव्या माहात्म्यमुत्तमं ॥ अतः परं प्रजासर्गं भृग्वादीनां निबोधत ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति श्रीकूर्मपुराणे देव्या माहात्म्ये द्वादशोध्यायः ॥ गौरीसहस्रनामः ॥ सूत उवाच ॥ भृगोः ख्यात्यां समुत्पन्ना
लक्ष्मीर्नारायणप्रिया । देवौ धातृविधातारौ मेरोर्जामातरौ शुभौ । आयतिर्नियतिश्चैव मेरोः कन्ये महात्मनः । तयोर्धातृ
विधातृभ्यां तौ वजातौ सुतावुभौ ॥ प्राणश्चैव मृकण्डुश्च मार्कण्डेयो मृकण्डवः ॥ तथा वेदशिरा नाम प्राणस्य द्युतिमान् सुतः
मारीचेरपि संभूतिः पूर्णमासमसूयत । कन्याचतुष्टयं चैव सर्वलक्षणसंयुतं ॥ अविरूपेण तथा तुष्टिः । अपित्विषापच
वितिस्तथा तपो निर्धूतकल्मषं ॥ अनसूया तथैवात्रेर्जज्ञे पुत्रानकल्मषान् ॥ सोमं दुर्वाससं चैव दत्तात्रेयं च योगिनं
स्मृतिश्चाङ्गिरसः पुत्रायहेत लक्षणसंयुता । सिनीवाली कुहूश्चैव राकामनुमतीमपि ॥ प्रीत्यां पुलस्त्यो भगवान् दत्तोलि
मसृजत्प्रभुः ॥ पूर्वजन्मनि सोगस्त्यः स्मृतः स्वायंभुवेन्तरे ॥ देवबाहुस्तथा कन्या द्वितीया नाम नामतः ॥ पुत्राणां षष्टिसा
हस्रं सन्नतिः सुषुवे क्रतोः । ते चोर्द्धरेतसः सर्वे बालखिल्या इति स्मृताः ॥ वशिष्ठश्च तथोर्जायां सप्तपुत्रानजीजनत् कन्यां च पुंड
रीकां श्रेष्ठां सर्वशोभासमन्वितं । रजोमात्रोर्द्धबाहुश्च सवनश्चानघस्तथा ॥ सुतपाः शुक्र इत्येते सप्त पुत्रा महौजसः ॥ योसौ रुद्रा
त्मको वह्निर्ब्रह्मणस्तनयो द्विजाः । स्वाहा तस्मात्सुतान्लेभे त्रीनुदारान्महौजसः पावकः पवनाश्च शुचिरग्निश्च ते त्रयः
निर्मथ्यः पवमानः स्याद्वैद्युतः पावकः स्मृतः । यश्चासौ तपते सूर्ये शुचिरग्निस्त्वसौ स्मृतः ॥ तेषां तु संततावन्ये चत्वारिं
शत्पंच च ॥ पवमानः पावकश्च शुचिस्तेषां पिता च यः ॥ एते चैकोनपंचाशद्वह्नयः परिकीर्तिताः सर्वे तपस्विनः प्रोक्ता
ऽ सर्वे यज्ञेषु भागिनः । रुद्रात्मकाः स्मृताः सर्वे त्रिपुण्ड्रांकितमस्तकाः ॥ अयज्वानश्च यज्वानः पितरो ब्रह्मणः सुताः ॥ अग्निष्वात्ता
बर्हिषदो द्विधा तेषां व्यवस्थितिः ॥ तेभ्यः स्वधा सुतेजज्ञे मेनां वैधारिणीं तथाऽ ते उभे ब्रह्मवादिन्यौ मुनिसत्तमाः ॥ अमृतं मेना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कूर्म·
२८ ॥

मैनाकं क्रौञ्चं जनयामास जज्ञे तथा॥ गंगा हिमवतो जज्ञे सर्वलोकैकपावनी। स्वयोगाग्निबलाद्देवी पुनर्जज्ञे महेश्वरं॥ यथावत्क-
थितं पूर्वं देव्या माहात्म्यमुत्तमं॥ धातुर्नियतिरायतिस्तु पत्नी पद्मासमानता॥ देवौ धाताविधातारौ मेरोर्जामातरावुभौ
एषा वंशस्य कं ख्यातं मया पस्वीत्रराविः॥ ख्याख्यानाभवता सप्तो मनोऽत्र इतिनिबोधत॥ ॥इति श्रीकूर्मपुराणे
त्रयोदशोध्यायः॥ सूत उवाच॥ प्रियव्रतोत्तानपादौ मनोः स्वायंभुवस्य तु॥ धर्मज्ञौ तौ महावीर्यौ ज्ञानरूपाश्वजौ जन-
न॥ ततोत्तानपादस्य ध्रुवो नाम सुतोभवत्॥ भक्तो नारायणे सोऽपि प्राप्तवान्स्थानमुत्तमं॥ ध्रुवाच्छिष्टिं च भव्यं च भ-
व्याच्छंभुर्व्यजायत॥ शिष्टेराधत्त सुच्छाया पंच पुत्रानकल्मषान्॥ नारायणपराञ्छुद्धान्स्वधर्मपरिपालन॥ रिपो रकुत्र महि-
षी चक्षुषं सर्वतेजसं॥ सोऽजीजनत्पुष्करिण्यां वीरण्यां चाक्षुषं मनुं॥ प्रजापतेरात्मजायां आरण्यस्य महात्मनः॥ मनोरजा-
यन्त दश सुतास्तेनु महौजसः॥ कन्यायां तु महादीप्ता वैराजस्य प्रजापतेः॥ ऊरुः पूरुः शतद्युम्नस्तपस्वी सत्यवाक्शुचिः॥ अग्निष्टु-
दतिरात्रश्च सुद्युम्नश्चाभिमन्युकः॥ ऊरोरजनयत्पुत्रान्षडाग्नेयी महाबलान्॥ अंगं सुमनसं ख्यातिं क्रतुमंगिरसं शिवं॥
अंगाद्वेनो भवत्पश्चाद्वैन्यो वेनादजायत॥ यो सौ पृथुरिति ख्यातः प्रजापालो महाबलः॥ येन दुग्धा मही पूर्वं प्रजानां हि-
तकाम्यया॥ नियोगाद्ब्रह्मणः सार्द्धं देवेन्द्रेण महौजसा॥ वेनपुत्रस्य वितते पुरा पैतामहे शुभे॥ सूतः पौराणिको ज- ॥ (लं)ः ॥
ज्ञे मायारूपः स्वयं हरिः॥ प्रवक्ता सर्वशास्त्राणां धर्मज्ञो गुणवत्सलः॥ तं मां वित्त मुनिश्रेष्ठाः पूर्वोद्भूतं सनातनं॥ अस्मिन्म- ॥ २८ ॥
न्वंतरे व्यासः कृष्णद्वैपायनः स्वयं॥ श्रावयामास मां प्रीत्या पुराणं पुरुषो हरिः॥ मदन्वये तु ये सूता संभूता वेदवर्जि-
ताः॥ तेषां पुराणवक्तृत्वं वृत्तिरासीदजाज्ञया॥ स च वैन्यः पृथुर्धीमान् सत्यसंधो जितेन्द्रियः॥ सार्वभौमो महातेजाः स्व

28

धर्मपरिपालकः ॥ तावत्तस्यात्मजस्यैव भक्तिर्नारायणे भवान् ॥ सवे धनगिरिल्कप्रामलपलेपेतिनेदयः ॥ नपसा भगवान्श्री
नः शंखचक्रगदाधरः ॥ आगम्य देवो राजानं प्राह दामोदरः स्वयं ॥ धार्मिकोन नृपसंपन्नो सर्वत्राम्रमतोवरो ॥ मम्प्रसादसम्वै
पुत्रौ नवमविष्यतः ॥ एवमुक्त्वा हृषीकेशः कीर्त्ता प्रकृतिंगतः ॥ वेयोहिवेदविधिपित्र्यलाभ क्रियुक्तं ॥ सोपालयन्त्वकेरा
ज्यंविनयन्तच्युतदत्तं ॥ स्वविरादिवनं वेगीभार्यासमन्वितस्तता ॥ शिवंडिनं हृषिकेशो नमनञ्जोनाख्यायत ॥ शिखंडिनोभ
वत्पुत्रः सुशीलई तिविश्रुतः ॥ धार्मिको नृपसंपन्नो वेदवेदांगपारगः ॥ सोधीत्यविविधिवत्वेदान्धर्मेता नपसिस्थितः ॥
मतिं चक्रे भागवतोगात्संन्यासं प्रति धर्मवित् ॥ सकृत्वातीर्थसंसेवां स्वाध्यायेन तपसि स्थितः ॥ जगाम हिमवत्पृष्ठे कदाचि
त्सिद्धसेवितं ॥ तत्र धर्मवनं नाम धर्मसिद्धिप्रदं वलं ॥ अत्र वै पश्यतां योगिनां ऽगम्यं अगम्यं ब्रह्मवादिहिषां ॥ तत्र मंदाकिनी नाम
सुपुण्या विमला नदी ॥ पद्मोत्पलवनोपेता सिद्धाश्रमविभूषिता ॥ स तस्या दक्षिणे तीरे मुनीन्द्रैयोगिभिर्युतं ॥ सुपुण्यप
माश्रमं रम्यं मपश्यच्छान्तिसंयुतं ॥ मंदाकिनी जले स्नात्वा संतर्प्य पितृदेवता ॥ अर्चयित्वा महादेवं पुष्पैः पत्रोत्पलादि
भिः ध्यात्वार्कसंस्थमीशानं हिरण्याघायवांजलि ॥ संप्रेक्ष्य मागतो भास्वन्मेरुह्या वपरमेश्वरं ॥ तदाध्यायेन विशिष्टंसुत्स्यव
हितेनच ॥ अन्यैश्च विविधैः स्तोत्रैः शांभवैर्वेदसंभवैः ॥ अथास्मिन्नंतरे पश्यन्नमायांनमहामुनिश्वेताश्वतरनामानं मतापश्च
यनोत्तमं ॥ भस्मसंविस्वसर्वांगं कौपीनाच्छादनान्वितं ॥ तपसा हृषितात्मानं प्रस्नावृत्तोपवानितं ॥ समाप्यसंस्तवं शंभोश
तादृश्च विलेक्षणाः ॥ ववंदे शिरसा पत्रैः प्रांजलिर्वाक्यमब्रवीत् ॥ धर्मो समय्य नृगृहीतोस्मि पश्येराख्या मुनीश्वरः ॥ योगीश्च
रे धन्य भगवान्दृष्टो योगविदांवरः ॥ अद्य मे सफलं जन्म तपांसि सफलानि मे किं करिष्यामि शिष्योहं भवमां पालयानघ

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सोनुगृह्याप्यतातानं सुशीलं शीलसंयुतं ॥ शिष्यत्वे प्रतिजग्राह तपसा क्षीणकल्मषं । सांन्यासिकं विधिं कृत्स्नं कारयित्वा
विचक्षणा ॥ दधौ तदैश्वरं ज्ञानं स्वशाखाविहितव्रतं । अशेषं वेदसारं तत्पशुपाशविमोचनं । अन्त्याश्रममिति ख्यातं ब्रह्मादि
भिरनुष्ठितं ॥ उवाच शिष्यान्संप्रेक्ष्य येतत्राश्रमवासिनः ॥ ब्राह्मणाः क्षत्रिया वैश्या ब्रह्मचर्यपरायणाः ॥ मया प्रवर्तितां शा
खां मदीयामिह योगिनः ॥ समस्यतं महादेवं ध्यायन्तो विश्वमैश्वरं ॥ इहदेवो महादेवो रममाणः सहोमया ॥ अध्यास्ते भगवानी
शो भक्तानामनुकंपय ॥ इहाशेषजगद्धाता पुरा नारायणः स्वयं ॥ आराधयन्महादेवं लोकानां हितकाम्यया ॥ इहैव देव
कीशानं देवानामपि दैवतं ॥ आराध्य महतीं सिद्धिं लेभिरे देवदानवाः ॥ इहैव मुनयः सर्वे मरीच्याद्या महेश्वरं ॥ दृष्ट्वा त
पोबलान्महाज्ञानं लेभिरे सार्वकालिकं ॥ तस्मादन्यमपि राजेन्द्र तपोयोगसमन्विताः ॥ निष्ठा नित्यं गमालाङ्क्षन्तः सिद्धिम
वाप्स्यथ ॥ एवमाभाष्य विप्रेन्द्रो देवध्यानपिनाकिनं ॥ अत्र वक्ष्ये महामंत्रं यथावत्सर्वसिद्धये ॥ सर्वपापोपशमनं वेदसा
रं विमुक्तिदं ॥ अग्निरित्यादिकं पुण्यं ऋषिभिः संप्रवर्तितं ॥ सोपि तद्वचनाद्राजा सुशीलः श्रद्धयान्वितः ॥ साक्षा
त्पशुपतेर्भवत्वा वेदाभ्यासरतोभवेत् ॥ भस्मोद्धूलितसर्वाङ्गः कंदमूलफलाशनः ॥ शान्तो दान्तो जितक्रोधः संन्या
सविधिमाश्रितः ॥ हविर्धानस्तथाग्नेय्यां जनयामास सत्सुतं ॥ प्राचीनबर्हिषं नाम्ना धनुर्वेदस्य पारगं ॥ प्राचीनब
र्हिर्भगवान्सर्वशास्त्रभृतां वरः ॥ समुद्रतनयायां वै दशपुत्रानजीजनत् ॥ प्रचेतसस्ते विख्याता राजानः प्रथितौजसः
अधीतवन्तः स्ववेदं नारायणपरायणाः ॥ दशभ्यस्तु प्रचेतोभ्यो मारिषायां प्रजापतिः ॥ दक्षो जज्ञे महाभागो यः
सर्वप्रणाः स्मृतः ॥ स तु दक्षो महेशेन रुद्रेण सह धीमता ॥ कृत्वा विवाहं रुद्रेणाभिशप्तः प्राचेतसोभवत् ॥ समायातं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

महादेवो दक्षां देवागतं हरः। दृष्ट्वा यथोचितां पूजां दक्षाय प्रददौ स्वयं तदा स्वेन सभाविष्टः सोधिकां घस्लागयनः। पूज्या मन्नर्गिरि
छन्नजगामकुपितो गृहं। कदाचित् स्वगृहं प्राप्तं सतीं दक्षः सुदुर्मनाः॥ भर्त्रा सह विनिर्धूतां भर्त्सयामास वै रुषा॥ अन्ये जामातरः श्रे
ष्ठा भर्तुस्तव पिनाकिनः॥ त्वमप्यसत्सुता स्मात्कं गृहाद्गच्छ यथागतं॥ तस्य तद्वाक्यमाकर्ण्य सा देवी शंकरप्रिया॥ विनिंद्यापित
रं दक्षं ददाहात्मानमात्मना॥ प्रणम्य पशुभर्त्तारं भर्त्तारं कृत्तिवाससं॥ हिमवद्दुहिता साभूत् तपसा तस्य तोषिता॥ ज्ञात्वा
तां भगवान् रुद्रः। प्रपन्नार्त्तिहरो हरः। शशाप दक्षं कुपितः समागत्याथ तद्गृहं। त्यक्त्वा देवमिमं ब्रह्मन् क्षत्रियाणां कुले भव॥
स्वस्यां सुतायां मूढात्मा पुत्रमुत्पादयिष्यसि। एवमुक्त्वा महादेवो ययौ कैलासपर्वतं स्वायंभुवोपि कालेन दक्षः प्राचेतसो
भवत्॥ एतद्वः कथितं सर्वं मनो स्वायंभुवस्य तु निसर्गं दक्षपर्य्यन्तं शृण्वतां पापनाशनं॥ ॥ इति श्रीकूर्मपुराणे राजवंशा
नुकीर्त्तने चतुर्दशोध्यायः॥ १४ ॥ नैमिषेया ऊचुः। देवानां दानवानां च गंधर्वोरगरक्षसां। उत्पत्तिं विस्तरात् सूत ब्रूहि वैवस्व
ते तरे॥ स शप्तः शंभुना पूर्वं दक्षः प्राचेतसो नृपः॥ किमकार्षीन्महाबुद्धिः श्रोतुमिच्छाम सांप्रतं॥॥ सूत उवाच॥ वक्ष्ये नारा
यणेनोक्तं पूर्वकल्पानुषंगिकं॥ त्रिकालबद्धं पापघ्नं प्रजासर्गस्य विस्तरं॥ स शप्तः शंभुना पूर्वं दक्षः प्राचेतसो नृपः
विनिंद्य पूर्ववैरेण गंगाद्वारे यजद्भवं॥ देवाश्च सर्वे भागार्थं आहूता विष्णुना सह॥ सहैव मुनिभिः सर्वैरागता ऋषिपुंगवा
: दृष्ट्वा देवकुलं कृत्स्नं शंकरेण विनागतं॥ दधीचो नाम विप्रर्षिः प्राचेतसमथाब्रवीत्॥ दधीचिरुवाच॥ ब्रह्मादयः पि
शाचांता यस्याज्ञानुविधायिनः॥ स देवः सांप्रतं रुद्रो विधिना किं न पूज्यते॥ दक्ष उवाच॥ सर्वेष्वेव हि यज्ञेषु न भागः
परिकल्पितः॥ न मंत्रा भार्यया सार्द्धं शंकरस्येति नेज्यते॥ विहस्य दक्षं कुपितो वचः प्राह महामुनिः। शृण्वतां सर्वदे

कूर्म॰ ॥
३० ॥

वानां सर्व्वज्ञानमयः स्वयं ॥ दधिचिरुवाच ॥ यतः प्रवृत्ति विश्वात्मा नत्वासौ परमेश्वरः ॥ सम्पूज्यते सर्व्वयज्ञैर्विदित्वा किं त्वशंकरः ॥ दक्ष उ
वाच ॥ नह्ययं शंकरो रुद्रः संहर्त्ता तामसो हरः ॥ नग्नः कपाली विकृतो विश्वात्मा नोपपद्यते ॥ ईश्वरो हि जगत्स्रष्टा प्रभुर्नारायणो हरिः ॥ स
त्वात्मको सौ भगवानिज्यते सर्व्वकर्म्मसु ॥ दधीचिरुवाच ॥ किं त्वया भगवानेष सहस्रांशुर्न दृश्यते ॥ सर्व्वलोकैकसंहर्त्ता कालात्माप
रमेश्वरः ॥ य आदित्यो भगवान् रुद्रो नीलग्रीवो विलोहितः ॥ संस्तुवन्ति सहस्रांशुः सामगाध्वर्युहोतृभिः ॥ पश्यैनं विश्वकर्म्माणं रुद्र
मूर्त्तिं त्रयीमयं ॥ दक्ष उवाच ॥ य एते द्वादशादित्या आगता यज्ञभागिनः ॥ सर्व्वे रुद्रा इति ज्ञेया नान्यो विद्यते रविः ॥ एवमुक्ते तु
मुनयः तु मुनयः समायाता दिदृक्षवः ॥ वाढमित्यब्रुवन् दक्षं तस्य साहाय्यकारिणः ॥ तमसाविष्टमनसो न पश्यन्ति वृषध्वजं ॥
सहस्रशोऽथ शतशो भूय एव हि निन्दितो वैदिकान्मन्त्रान् सर्व्वभूतपतिं हरं ॥ अपूजयद्विष्णुवाक्यं मोहिता विश्वमा
यया ॥ देवाश्च सर्व्वे भोगार्थमागता वासवादयः ॥ न पश्यन्ति देवमीशानमृते नारायणं हरिं ॥ हिरण्यगर्भो भगवान् ब्रह्मा
ब्रह्मविदां वरः ॥ पश्यतां मे वसर्व्वेषां क्षणादन्तरधीयत ॥ अन्तर्हिते भगवति दक्षो नारायणं हरिं ॥ रक्षकं जगतां देवं जगाम शर
णं स्वयं ॥ प्रवर्त्तयामास च तं यज्ञं दक्षोऽथ निर्भयः ॥ रक्षको भगवान् विष्णुः शरण्यो गतरक्षकः ॥ पुनः प्राह च तं दक्षं दधीचो
भगवानृषिः ॥ सम्प्रेक्ष्यर्षिगणान् देवान् सर्व्वांश्चैव ब्रह्मविद्विषः ॥ अपूज्यपूजने चैव पूज्यानां चाप्यपूजने ॥ नरः पापमवाप्नो
ति महद्वै नात्र संशयः ॥ असतां प्रग्रहो यत्र सतां चैवावमाननं ॥ दण्डो देवकृतस्तत्र सद्यः पतति दारुणः ॥ एवमुक्त्वा तु
विप्रर्षिः शशापेश्वरविद्विषः ॥ समागतान् ब्राह्मणांस्तान् दक्षस्य सहायकारिणः ॥ यस्माद्बहिष्कृतो वेदाद्भवद्भिः परमेश्वरः ॥
विनिन्दितो महादेवः शंकरो लोकवन्दितः ॥ भविष्यथ त्रयीबाह्याः सर्व्वेऽपीश्वरविद्विषः ॥ निन्दित्वा ह्यैश्वरं मार्गं कुशास्त्रासक्तचे

पु॰ ॥
३० ॥

30

तस्मा॥ मिथ्याधीनसमाचाराः मिथ्याज्ञानप्रलापिनः प्राप्य कलियुगं घोरं कलिजैः परिपीडिताः । त्यक्त्वा तपोवनं कृत्स्नं गच्छथं नरकोत्त-
नः ॥ भविष्यति हृषीकेशः स्वाश्रितोपि परान्मुखः । एवमुक्त्वाथ विप्रर्षिर्विरराम महायोनिधिः । जगाम मनसा तद्य महेशो पापविनाश-
नं ॥ एतस्मिन्नन्तरे देवी महादेवं महेश्वरं । पतिं पशुपतिं देवं ज्ञात्वैतन्माह सर्वदृक ॥ श्रीदेव्युवाच ॥ दक्षो यज्ञेन यजते पिता मे पूर्व-
जन्मनि ॥ विनिघ्न भगवन्सो भावमात्मानं चापि शंकरः । देव्या सहर्षं यच्छ्रुत्वा सन् तत्र साक्षात्यकारिणाः । विनाशया सुतं यज्ञं तव मेतं
हा तोस्पदं ॥ एवं विज्ञापितो देव्या देवदेवः परः प्रभुः । ससर्ज सहसा तद्वद्दक्षयज्ञविधांसया ॥ सहस्रशिरसं क्रुद्धं सहस्राक्षं महा-
भुजं ॥ सहस्रपाणिं दुर्धर्षं युगान्तानलसन्निभं ॥ दंष्ट्राकरालं दुष्प्रेक्ष्यं शंखचक्रधरं प्रभुं ॥ दण्डहस्तं महानादं शार्ङ्गिणं भूतिभू-
षितं ॥ वीरभद्र इति ख्यातं देवदेवसमन्वितं ॥ स जातमात्रो देवेशमुपतस्थे कृताञ्जलिः ॥ तमाह दक्षस्य मखं विनाशय शिवो-
स्तु ते ॥ विनिंदय मां स यजते गंगाद्वारे गणेश्वरं ॥ ततो बन्धप्रमुक्तेन सिंहेनैकेन लीलया ॥ वीरभद्रेण दक्षस्य विनाशमगम-
त्क्रतुः ॥ मन्युनाचापि महादेवस्थाप्य भद्रकाली महेश्वरी ॥ तया च सार्द्धं वृषभं समारुह्य ययौ गणाः ॥ अन्ये सहस्रशो रुद्रा निसृष्टास्ते-
न धीमता ॥ रोमजा इति विख्याता तस्य साहाय्यकारिणाः ॥ शूलशक्तिगदाहस्तं दंष्ट्रोपलकरास्तथा ॥ कालाग्निरुद्रसं-
काशा नादयन्तो दिशो दश ॥ सर्वे वृषभमारूढा सभार्य्याश्चातिभीषणाः ॥ समावृत्य गणश्रेष्ठं ययुर्दक्षमखं प्रति ॥ स-
र्वे संप्राप्य तं देशं गंगाद्वारमिति श्रुतं ॥ ददृशुर्यत्र देवेशो दक्षमानीतं प्रजापतिं ॥ उवाच संस्थितो नन्दे वीरभद्रस्तपत्रिव ॥
वयं ह्यनुचराः सर्वे सर्वस्यामिततेजसः भागार्थे लिप्सया प्राप्ता भागान्प्रयच्छ नोमी प्सालान ॥ अथ वे क्रतवादिदिवं माया-
भिवीनिक्षमाः ॥ भागो भवद्भ्यो देयस्तु नास्म भ्यमिति कथ्यतां ॥ तं ब्रूता ज्ञापयति यो नवेत्स्यामो वयं ततः ॥ एवमुक्त्वा ग

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कूर्म· रोद्रेण प्रतापन्निपुरस्पराः ।। देवाः क्रुद्धाः ।। प्रमाराणां वीनजानीमभागे मंत्रा इति श्रुतेः । मंत्रात्रः सुराध्यक्षं नमो वहनने च नमः । येनाद्यास्माए
२१ ।। जानं दक्षयेषु मर्हेश्वरं ।। ईश्वरः सर्वभूतानां सर्वदेवतनुर्हरः ।। स्तूयते सर्वयज्ञेषु सकोऽयमुदयमिछिदः ।। एवं कुक्षामहेशानं मा
ययानष्टवेनसः ।। नमे निरिपञ्जमंत्रा देवाम्पुक्तास्वमालयं ।। ततः सरुद्रो भगवान् सभार्यः सगणेश्वरः ।। स्पृष्ट्वा नकराभ्यां विप्र
र्षिदधीचं प्राह देवहा । मंत्रा प्रमाणं न कृतायुष्माभिर्बलदर्पितैः ।। तस्मात्प्रसह्य तस्माद्योनाशयामः घगरितां इत्युक्त्वा यज्ञ
शालानां दग्ध्वा गणेश्वराः । गणेश्वरः सुसंक्रुद्धाः पात्रयावविक्षिपुः ।। वीरभद्रोपि दीप्तात्मा शक्रस्यैवोद्यतं करं ।। व्यष्टम्भ
यद्दीनानाम्यानथाप्येषां दिवौकसां ।। भगनेत्रे तथोत्पाट्य करागेणैव लीलया ।। निहत्य मुष्टिनां दंतान् पूष्णश्चैवान्यपातयत्
तथा चंद्रमसं देवं पादांगुष्ठेन लीलया ।। घर्षयामास बलवान् स्मयमानो गणेश्वरः ।। वह्नेर्हस्तद्वयं छित्वा जिह्वामुत्पाट्य लील
या ।। जघान मूर्ध्निं पादेन मुनीनपि मुनीश्वर ।। तथा विष्णुं सगरुडं समायांतं महाबलः ।। विव्याध निशितैर्वाणैः स्तंभयित्वा सु
दर्शनं ।। समालोक्य महावाहुरागत्य गरुडोगरुत् ।। जघान पक्षैः सहसा ननाद जलधिर्यथा ।। ततः सहस्रशो रुद्रः सस्रजे ग
रुडानात्मवं ।। वैनतेयादभ्यधिकान् गरुडं तं प्रदुद्रुवुः ।। तान् दृष्ट्वा गरुडो धीमान् पलायत महाजवः ।। विसृज्य माधवं वेगा ।। पू· ।।
न्नदद्भुतमिवाभवत् ।। अंतर्हिते वैनतेये भगवान् पद्मसंभवः ।। आगत्य वारयामास वीरभद्रं च केशवं ।। प्रसादयामास ।।३१।।
च तं गौरवात् परमेष्ठिनः ।। संस्तूय भगवानीशं हंसो ब्रह्मागमन्त्रयं ।। वीक्ष्य देवादिदेवं तं उमां सर्वगुणेश्वरां ।। तुष्टाव भग
वान् ब्रह्मा दक्षः ।। सर्वे दिवौकसः ~~विशेषकायावं~~ नीदेवीमीश्वरार्द्धशरीरिणीं ।। स्तोत्रैर्नानाविधैर्दक्षः प्रणम्य च कृताञ्जलिः ।
ततो भगवती देवी प्रहसंती महेश्वरं । प्रसन्नमनसा रुद्रं वचः प्राह घृणानिधिः ।। त्वमेव जगतः स्रष्टा शासिता चैव रक्षिता

31

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्वयाचो भगवतो दक्षस्यापि दिवौकसः॥ ततः प्रहस्य भगवान् कपर्दी नीललोहितः। उवाच प्रणतान्देवान्प्राचेतसमथो ह
रः॥ गच्छध्वं देवताः सर्वाः प्रसन्नो भवतामहं॥ संपूज्यः सर्वदा हं तु भवद्भिर्योऽहं विशेषतः॥ त्वयापि श्रुणु मे दक्ष वचनं सर्वरक्षणं। त्यक्त्वा
लोकैषणामेतां मद्भक्तो भव यत्नतः॥ भविष्यसि गणेशानः कल्पान्तेऽनुग्रहान्मम॥ तावत्तिष्ठ ममादेशात्स्वाधिकारेषु निर्वृतः॥ ए
वमुक्त्वा स भगवान्सपत्नीकः सहानुगः॥ अदर्शनमनुप्राप्तो दक्षस्यामिततेजसः॥ अन्तर्हिते महादेवे शंकरे पद्मसंभवः॥ व्याज
हार स्वयं दक्षमशेषजगतो हितं॥ ब्रह्मोवाच॥ किं तवैष भवतो मोहः प्रसन्ने वृषभध्वजे। यदा स्वयं देवः पालयेत्त्वामतंद्रि
तः॥ सर्वेषामेव भूतानां हृद्येष परमेश्वरः॥ पश्यन्ति यं ब्रह्मभूता विद्वांसो वेदवादिनः॥ स आत्मा सर्वभूतानां स बीजं परमा
गतिः॥ स्तूयते वैदिकैर्मन्त्रैर्देवो महेश्वरः॥ तमर्चयन्ति ये रुद्रं स्वात्मना स्वात्मनि स्थितं॥ चेतसा भवयुक्तेन ते यान्ति परमं पदं
तस्मादनादिमध्यान्तं विज्ञाय परमेश्वरं॥ कर्मणा मनसा वाचा समाराधय यत्नतः॥ यत्नात्परिहरेशस्य निन्दामात्मविनाशि
नी भवन्ति सर्वदोषाय निन्दकस्य क्रिया हि ताः॥ यस्तवैष महायोगी रक्षको विष्णुरव्ययः॥ स देवो भगवान्रुद्रो महादेवो न
संशयः॥ मन्यन्ते ये जगद्योनिं विभिन्नं विष्णुमीश्वरात्॥ मोहादवेदनिष्ठत्वात्ते यान्ति नरकं नराः। वेदानुवर्तिनो रुद्रं देवं
नारायणं तथा॥ एकीभावेन पश्यन्ति मुक्तिभाजो भवन्ति ते॥ यो विष्णुः स स्वयं रुद्रो यो रुद्रः स जनार्दनः॥ इति मत्वा भजे
द्देवं स याति परमां गतिं॥ सृजत्येतज्जगत्सर्वं विष्णुस्तत्पश्यतीश्वरः॥ इत्थं जगत्सर्वमिदं रुद्रनारायणोद्भवं॥ तस्मात्त्यक्त्वा ह
रेर्निन्दां हरे वापि समाहितः॥ समाश्रयेन्महादेवं शरण्यं ब्रह्मवादिनां॥ उपश्रुत्याथ वचनं विरिञ्चस्य प्रजापतिः॥ जगाम शर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रांतरवेगोपतिं कृत्तिवाससं ॥ ये ये त्वा पाभिनिंदंस्यादधीचस्य महर्षयः ॥ छिंधंतो मोहिता देवं संभवं भवः कलिवथा ॥ त्यक्त्वा
तपोबलं कृत्स्नं विप्राणां कुलसंभवाः ॥ पूर्वसंस्कारमाहात्म्याद्ब्रह्मणो वचनादिह ॥ मुक्तशापास्ततः सर्वे कल्पांते रौरवादिषु ॥ निपा
त्यमाना कालेन संप्राप्यादित्यवर्चसं ॥ ब्रह्माणं जगतामीशमनुज्ञाता स्वयंभुवा ॥ समाराध्य तपोयोगादीशानं त्रिदशाधिप ॥ भवि
ष्यंति यथापूर्वं शंकरस्य प्रसादतः ॥ एतद्वः कथितं सर्वं दक्षयज्ञनिषूदनं ॥ शृणुध्वं दक्षपुत्रीणां सर्वासां चैव संततिं ॥ ॥ इति श्री
कूर्मपुराणे दक्षयज्ञविध्वंसः पंचदशोध्यायः ॥ ॥ सूत उवाच ॥ प्रजाः सृजेति संदिष्टः पूर्वं दक्षः स्वयंभुवा ॥ ससर्ज देवान्गंधर्वा
न् ऋषींश्चैवासुरोरगान् ॥ यदास्य सृजतः पूर्वं न व्यवर्द्धंत ताः प्रजाः ॥ तदा ससर्ज भूतानि मैथुनेनैव सर्वतः ॥ असिक्न्यां
जनयामास वीरणस्य प्रजापतेः ॥ सुतायां धर्मयुक्तायां पुत्राणां तु सहस्रके ॥ तेषु पुत्रेषु नष्टेषु मायया नारदस्य तु ॥ षष्टिं दक्षो
ऽसृजत्कन्या वैरण्यां वै प्रजापतिः ॥ ददौ स दश धर्माय कश्यपाय त्रयोदश ॥ विंशत्सप्त च सोमाय चतस्रोऽरिष्टनेमये ॥ द्वे चैव ब
हुपुत्राय द्वे कृशाश्वाय धीमते ॥ द्वे चैवांगिरसे तद्वत्तासां वक्ष्ये च विस्तरं ॥ मरुत्वती वसुर्यामी लंबा भानुररुंधती ॥ संकल्पा च मुहू
र्त्ता च साध्या विश्वा च भामिनी ॥ धर्मपत्न्यो दश त्वेतास्तासां पुत्रान्निबोधत ॥ विश्वेदेवास्तु विश्वायाः साध्या साध्यानजीजनत् ॥ ॥ रामः ॥
मरुत्वत्यां मरुत्वंतो वसोस्तु वसवस्तथा ॥ भानोस्तु भानवश्चैव मुहूर्त्तास्तु मुहूर्त्तजाः ॥ लंबायाश्चाथ घोषोथ नागवीथी तु यामिजा ॥ ३२ ॥
॥ पृथिवीविषयं सर्वमरुंधत्यामजायत ॥ संकल्पायास्तु संकल्पो धर्मपुत्रा दश स्मृताः ॥ ये त्वनेकवसुप्राणा देवा ज्योतिः पुरो
गमाः ॥ वसवोष्टौ समाख्यातास्तेषां वक्ष्यामि विस्तरं ॥ आपो ध्रुवश्च सोमश्च धरश्चैवानलोऽनिलः ॥ प्रत्यूषश्च प्रभासश्च वसवो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

घोषप्रकीर्त्तिताः ॥ आपस्य पुत्रो वैतंड्यः श्रमः शान्तो ध्वनिस्तथा ॥ ध्रुवस्य पुत्रो भगवान्कालो लोकप्रकालनः ॥ सोमस्य भगवान्वर्चा धर-
स्य ड्रविणः सुतः ॥ मनोजवोनलस्यासीद्विज्ञातगतिस्तथा ॥ कुमारो ह्यनिलस्यासीत्सेनापतिरिति स्मृतः ॥ देवलो भगवान्योगी प्र-
त्यूषस्याभवत्सुतः ॥ विश्वकर्मा प्रभासस्य शिल्पकर्त्ता प्रजापतिः ॥ अदितिर्दितिर्दनुस्तद्वदरिष्टा सुरसा तथा ॥ सुरभिर्विनता चैव
ताम्रा क्रोधवशा इरा ॥ कद्रुर्मुनिश्च धर्मज्ञा तासु पुत्रान्निबोधत ॥ अंशो धाता भगस्त्वष्टा मित्रोऽथ वरुणोऽर्यमा ॥ विवस्वा-
न्सविता पूषा अंशुमान्विष्णुरेव च ॥ तुषिता नाम ते पूर्वं चाक्षुषस्यान्तरे मनोः ॥ वैवस्वतेन्तरे प्रोक्ता आदित्याश्चादितेः सुताः
दितिः पुत्रद्वयं लेभे कश्यपाद्बलिनां वरौ हिरण्यकशिपुं ज्येष्ठं हिरण्याक्षं तथानुजं ॥ हिरण्यकशिपुर्दैत्यो महाबलपराक्रम-
ः ॥ आराध्य तपसा देवं ब्रह्माणं परमेश्वरं ॥ दृष्ट्वा लेभे वरान्दिव्यान्स्तुत्वासौ विविधैः स्तवैः ॥ अथ तस्य बलाद्देवाः सर्व एव म-
हर्षयः ॥ बाधितास्ताडिता जग्मुर्देवदेवं पितामहं ॥ शरण्यं शरणं देवं शंभुं सर्वजगन्मयं ॥ ब्रह्माणं लोककर्त्तारं त्रातारं पुरुषं पु-
रं कूटस्थं जगन्नेत्रमेकं पुराणं पुरुषोत्तमं ॥ स याचितो देववर्यैर्मुनिभिश्च मनीश्वराः ॥ सर्वदेवहितार्थाय जगाम कमलासनः
संस्तूयमानः प्रणतैर्मुनीन्द्रैरमरैरपि ॥ क्षीरोदस्योत्तरं कूलं यत्रास्ते हरिरीश्वरः ॥ दृष्ट्वा देवं जगद्योनिं विष्णुं विश्वगुरुं शिवं ॥ व-
वंदे चरणौ मूर्ध्ना कृतांजलिरभाषत ॥ ॥ ब्रह्मोवाच ॥ त्वं गतिः सर्वभूतानामनन्तो ह्यखिलात्मकः ॥ व्यापी सर्वामरवपुर्मह-
योगी सनातनः ॥ त्वमात्मा सर्वभूतानां प्रधानः प्रकृतिः परा ॥ वैराग्यैश्वर्यनिरतो वागतीतो निरंजनः ॥ त्वं कर्त्ता चैव हर्त्ता च वि-
हन्ता सुरविद्विषां ॥ त्रातुमर्हस्यनन्तेश त्राता हि परमेश्वरः ॥ इत्थं स विष्णुर्भगवान्ब्रह्मणा संप्रबोधितः ॥ प्रोवाचोन्निद्रपद्म-

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ कर्म ॥ सर्वे ते वासवमुखाः सुराः ॥ किमर्थं भो महावीर्याः सप्रजापतिकाश्च याः ॥ इमं देशमनुप्राप्ताः किं कार्यं करोमि वः ॥ ॥ देवा ऊचुः ॥
॥ ३३ ॥ हिरण्यकशिपुर्नाम ब्रह्मणो वरदर्पितः ॥ बाधते भगवन्दैत्यो देवान्सर्वान्महर्षिभिः ॥ अवध्यः सर्वभूतानां त्वामृते पुरुषोत्तम ॥ हं
तुमर्हसि सर्वेषां त्राता त्वमसि विश्वं जगन्मय ॥ श्रुत्वा तु देवतैः सूक्तं सर्वविल्लोकभावनः वध्याय दैत्यमुख्यस्य मेने सृजन्स्वकं स्व
पं ॥ मेरुपर्वतवर्ष्माणं घोररूपं भयानकं ॥ शंखचक्रगदापाणिं तं प्राह गरुडध्वजः ॥ हत्वा तं दैत्यराजानं हिरण्यकशिपुं पुनः
चमं देशं समागन्तुं क्षिप्रमर्हसि पौरुषात् ॥ निशम्य वैष्णवं वाक्यं प्रणम्य पुरुषोत्तमं ॥ महापुरुषमव्यक्तं ययौ दैत्यं महत्
सरं ॥ विमुंच भैरवं नादं शंखचक्रगदाधरः ॥ आरुह्य गरुडं देवो महामेरुरिवापरः ॥ आकर्ण्य दैत्यप्रवरा महामेघरवोपमं
समं च चक्रुर्नादं तथा दैत्यपतिर्भयात् ॥ ॥ असुरा ऊचुः ॥ कश्चिद्दृश्यति महानद्भुतो देवनोदितः ॥ विमुंच भैरवं नादं तं न जा
नीमो जनार्दनः ॥ ततः सहासुरैः कैरेहिरण्यकशिपुः स्वयं ॥ सन्नद्धैः सायुधैः पुत्रैः स प्रह्लादैस्ततो ययौ ॥ दृष्ट्वा तं गरुडारूढं सूर्यको
टिसमप्रभं ॥ स पुरुषं पर्वताकारं नारायणमिवापरं ॥ दुद्रुवुः केचिदन्योन्यमूचुः संभ्रान्तलोचनाः ॥ अयं स देवो देवानां गोप्ता नाराय
णो रिपुः ॥ अस्माकमव्ययो नंतः नन्नृतो वा समागतः ॥ इत्युक्त्वास्त्रवर्गाणि ससृजुः पुरुषाय ते ॥ तृणं च भक्षनो देवो नाशयामास ॥ रामः ॥
लीलया ॥ हिरण्यकशिपोः पुत्राश्चत्वारः प्रथितौजसः ॥ पुत्रनारायणोद्भूतं पुयुधुर्मेघनिस्वनाः ॥ प्रह्लादश्चानुह्लादश्च संह्लादो ह्राद ॥ ३३ ॥
एव च ॥ ब्रह्मास्त्रमहितो त्रास्त्रमनुह्रादेन्द्रवैष्णवं ॥ संह्लादश्च ययौ कोप्माद्रं वा हे युक्ताश्च एव च ॥ तानि तं पुरुषं प्राप्य चत्वार्यस्त्रा
णि कोटिमवं ॥ नाशकुष्यालितं तिविर्घ्नं वासुदेवं यथानथं ॥ अथास्ते चतुरः पुत्रान्महाबाहुर्महाबलः ॥ प्रगृह्य पादेषु क

33

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रोत्रिं श्विक्षेपवननादव ॥ विमुक्तो घप्पत्रेण हिरण्यकशिपुः स्वयं ॥ पादिनताडयामास वैगेनोरसि नेवली । सनेन पीडितो म्य
थं गरुडेन महाभुजः ॥ सहस्रपत्रसदोन्मीय त्रनारायणः प्रभुः ॥ गत्वा विज्ञापयामास ब्रह्मविदि शिलेनप ॥ सेविन्यमनसा देवः स
र्वज्ञानमयोमलः ॥ नरस्यार्द्धतनुं कृत्वा सिंहस्यार्द्धतनुं तथा ॥ नृसिंहवपुरव्यक्तो हिरण्यकशिपोः पुरे ॥ आविर्बभूव देवेशः सभामास
दृष्ट्वे दैत्यपतनवारः ॥ दंष्ट्राकरालोपेतागात्माप्रगातदहनोपमः ॥ समाहत्यात्मनः शक्तिं सर्वसत्त्वःकारिणीं ॥ भाति नातयथाोऽत्र
नो यथा मध्यंदिने रविः ॥ दृष्ट्वा नरसिंहपुरुषं पूर्वं स्याडनशक्तितं ॥ सहैव तेनजैः सर्वैर्नाशयामुमपरितः ॥ सनेत्रियोगास्तुरः
प्रह्लादो विष्णुमव्ययं ॥ युयुधे सर्वयत्नेन नरसिंहेन राजितः ॥ ततः संतोहितो दैत्यो हिरण्याक्षस्य तत्रजः ॥ ध्यात्वा पशुपतेरहं
ससर्ज वननादच ॥ तस्य देवाऽपि देवस्य विष्णोरमिततेजसः ॥ महानिमफंगेदर्शयथादेवत्वप्रभृतिनः ॥ यथापतङ्गं त्वप्रती
हो भाग्यगोरवाय ॥ मेनेसर्वान्तकं देवं वासुदेवं सनातनं ॥ संत्यज्य सर्वभावानि सत्त्वबुद्ध्येन चेतस ॥ प्रणम्य शिरसा देवं
योगिनां हृदयस्थितं ॥ स्तुत्वा नारायणं स्तोत्रैः ऋग्यजुः सामसंभवैः ॥ निराधारो नरोभ्रान्त नृहिरण्याक्षनवन्नवान ॥ प्रपन्ना
रायणो नन ॥ शाश्वतो भगवानजः पुराणः पुरुषो देवो महायोगी जगन्मयः ॥ अयं धाता विधाता च स्वयंज्योतिर्जनः ॥
प्रधानं पुरुषं तत्त्वं ॥ मूलप्रकृतिरव्ययः ॥ ईश्वरः सर्वभूतानामनंतो योगिनां गतिः ॥ गच्छ शीघ्रमेवं शरणं विष्णुमव्ययक्रम
च्युतं ॥ वेष्टयंस्तेजसा हिरण्यकशिपुः स्वयं ॥ प्रोवाच पुत्रमन्यर्थं मोहितो विष्णुमायया ॥ अयं सर्वात्मना न वघोरसिंहो
त्वपराक्रमः ॥ समागतो मम्मृत्युर्वनीवासी कालचोदितः ॥ चित्स्यापि तेऽराव गांवगुः प्राहमहामतिः ॥ मानिंदितेन मीशानेभू

कर्म॰ ॥
२४ ॥

तानामेकमव्ययं। कथं देवो महादेवः शाश्वतः कालवर्जितः। कालेन हन्यते विष्णु कालात्मा कालरूपधृक्॥ ततः श्रुत्वा कश्चि
त्पुः प्रश्नस्य विधिनोदितः। निवारितो पितृत्रेणाष्टयोधहरिमव्ययं॥ संरक्तनयनो नं नो हिरण्यनयनाग्रजे। तदेव हि दारयाम
स प्रह्लादस्यैव पश्यतः॥ अन्नलाद्य दैत्याः पुत्राः अन्ये च बहवो नं भूराः॥ नृसिंहदेहसंभवैः सिंहैनीता यमक्षयं। ततः सहस्र
नदूपं हरिं नारायणः प्रभुः। एवमेव परमं रूपं पपयो नरायणाह्वयं। गते नारायणे देवः प्रह्लादो गुरुसत्तमः। अभिषेके नयु
क्तेन हिरण्याक्षमयो जगत। सेवाधयामास गुरानरसो जित्वा भूनीनपि। तथा धर्मक मतापुत्रे नयसा एवध्वंशं करं। देवान्
जित्वा सदेवेन्द्रान् ... वधारत्ती मिमां। नीत्वा रसातलं चक्रे नेतच्चैनि प्रभंजनपा ततः सर्वस्तु काद्देवाः परित्यक्ता अव
श्रियं। गत्वा वितापयामास विष्णुस्वं हरिमंदिरं। सर्विन यित्वा विष्णा न्यानद्धो पापमव्ययं॥ सर्वे देवमयं पुष्पं वा
राहं च सुराम्बुधे। गत्वा हिरण्यनयनं हत्वा नेतुस्तपो तम॥ वृषपोद्धरयामास कल्पादौ धरणी मिमां। रक्षका वा राहस
स्थानं संस्थाप्ये च सुरद्विषः। एवमेव प्रकृतिं दिव्यां यथौ विष्णुः परं पदं॥ तस्मिन्न ते मरीचिणो प्रहृष्टा स्ता विष्णु तत्परः।
ज्ञ पालयत्सवं करा ज्यं भावं तां ज्ञानतत्परं। यजते विधिवद्देवान् विष्णो राराधने रतः॥ निःसपत्नं सदा राज्यं तस्याशी ॥ राम: ॥
द्विष्णुवै भवान्॥ ततः कदाचिद् गुरो ब्रह्मलोकं गन्तुमागते। नवसेभावयामास देवानां चैवमायया। सते चतापसो ॥ २४ ॥
न्यर्थमाहेतेनाप मानितः॥ शशापासुरराजानं क्रोधसंरक्तलोचनः। यत्तदलंस पाप्मि स्वबलात्तान च मन्यसे। साम
त्रीवें हवी दिव्या विनाशी नीत गमिष्यति। इत्युक्त्वा प्रययौ न तां प्रह्लादस्य गृहाद् द्विजः। श्रुत्वा हाराज्यमे स संरूं सोपि विष्णापव

त्मानः ॥ वाधयामास विप्रेंद्र ननिर्विवेदजनार्दनं ॥ पितुर्वधमनुस्मृत्य क्रोधं चक्रे हरं प्रति ॥ तयोः समभवद्युद्धं घोरं रोमहर्षणं ॥ ना
रायणस्य देवस्य प्रह्लादस्य महाद्विजः ॥ कृत्वा स युद्धमतुलं जगविष्णुना तेन निर्जितः ॥ ततः प्रभृति दैत्यस्तु हाधनंत्यं समक्षितं बहुन ॥
नारायणतो मत्वा योगमवाप्य तपसा तमे ॥ हिरण्यकशिपोः पुत्रो योगसंसिद्धिचेतसि ॥ अवाप तन्महद्राज्यं मंधकोः पुरुषं गव
हिरण्यनेत्रनंदनः शंभोर्देहसमुद्भवः ॥ स देवस्य तनुमां देवीं चकमे पर्वतात्मजां ॥ पुरा दारुवने भाग्ये ह तनयो गरुमेघिनः ॥ स्य
राधरानाथांयत पश्चेनः सह स्वरः ॥ ततः कदाचिद्यहमी कालयोगेन तुल्लरा ॥ अनहृष्टिरती घोरा घासीद्भूत विनाशिनी ॥ सम
स्तमवेमुनियोगेन मंतपसा निधिं ॥ अयाचे तक्षधाविहृग्रा भरेप्राणाधारणं ॥ मनेभ्यः प्रद्दावत्रेम वंवहन्तं द्धः स
र्वेवुभजित विश्राति विंशं केत चेतसा ॥ गतेवद्दादशे वर्षे कल्याणः तशंकरी ॥ बभूव महती यथा वृष्टिः पर्वं मजागत ॥ ततः
सर्वेमुनिवराः समामेत्र्यपरस्परं ॥ महर्षिगौतमं प्रोचुर्गच्छामः इति वेगतः ॥ निवारयामास गौतमः कंचित्कालं यथोचितं ॥
ऊषित्वाम गृहे वर्ष्या वृद्धमितिमंडिताः ॥ ततो मायामयी सृष्टा कृष्णांगी सर्वोवनो समीपं प्रापयामास गौतमस्य मता
त्मना ॥ सोपवी स्य कृपाविष्ट तस्याः संरक्षणोत्सुकः ॥ गोपृष्ठे तां वंधयामास ल्पृहमात्रा ममार सा सहसोके ना भिलंतप्रःका
र्यकार्यमसाधुनिः ॥ नपश्यतिस्म सहसा तत् दृष्ट्वा मुनयो ब्रुवन् ॥ गोवध्येयं द्विजश्रेष्ठ ध्याकस्मवहारिरगाः ॥ नावत्रैन नस्येऽधुनाव्
गच्छामो धयमेवहि ॥ तेन ते तु मनाः सर्वो देवदारुवनं शुभं जग्मुः पापवशं नीत्वा तपश्चर्यां यथा पुरा ॥ सततेषां मायात्ता
नां गोवधयोगेन मोमुनि ॥ केनापि हेतुनाध्यात्वा वाशापपातीव कोपनः भविष्यंति त्रयेवाल्वमहापातककमिः समा ॥ बहुना
लेनथा ह्यापाजायमानाः पुनः पुनः ॥ सर्वे संप्राप्य योदेवेशशोकरं विश्रुमव्ययं ॥ मन्त्रवरलौकिकैः स्तोत्रैः स्तुष्टाईवलवं

कूर्म ॥
॥ ३५ ॥

गौ ॥ देवदेवीं महादेवीं भक्तानामार्त्तिनाशनीं ॥ कामदेवस्य महापापो गोपापात्तस्मात्तमर्दनः ॥ नेदपार्श्वस्थितं विष्णुं संप्रेक्ष्य मधुसूदनः ॥ किमेते
षां भवेत्कार्यं प्राह पुरुषोत्तमं विप्राणामपि ॥ ततः स भगवान्विष्णुः शरणागतवत्सलः ॥ गोपतिं प्राह विप्रेन्द्र नन्दी कुरु नो हरिः ॥ न देवा
हे पुरुषे पुण्यलोको मोपि शंकरः ॥ संगतेन महादेवः धर्मो देवाधिनिर्वमो ॥ तथापि भक्तवात्सल्याद्दक्षिणत्वो महेश्वरः ॥ अस्मान्निः सर्वदेवै
र्नेगंतारो नरकानपि ॥ तस्मादिदेव देवानां रक्षणार्थाय यापिनां ॥ विमोहनाय शास्त्राणि करिष्यामो हे वृषध्वज ॥ एवं संबोधितो
रुद्रो माधवेन मुरारिणा ॥ चकार मोहशास्त्राणि केशवो पि शिवेरितः ॥ कापालं नाकुलं वामं भैरवं पूर्वपश्चिमं ॥ पंचरात्रं पाशुपतं
तथान्यानि सहस्रशः ॥ सृष्ट्वा तान्याह निर्दिष्टाः कुर्वीराणां शास्त्रनादितं ॥ पततं नरके घोरे बहून्कल्पान्पुनः पुनः ॥ जायंते मानुषे
लोके क्षीणापापाचयास्ततः ॥ ईश्वराराधनबलाद्गच्छंति सुकृतां गतिं ॥ वर्त्तध्वं मत्प्रसादेन नानाख्यानिः कृतिर्हिवः ॥ गवामीश्व
रं विष्णुं गोविंदेति नाम महर्षयः ॥ आदेशं प्रययौ तत्र विष्णुश्चापि विहिह्नः ॥ वकुलेन्यानि शास्त्राणि समस्तं रक्षपुनः ॥ शिवाम
ध्याय पापाणुर्दर्शयितुं नापतानि च ॥ मोहयन्नहं मल्लोकं ज्ये वर्णार्या महीतले ॥ चकार शंकरो भिक्षां हितायेषां द्विजैः सह ॥
कपालमालाभरणः प्रेतभस्मावगुंठितः ॥ विमोहयंल्लोकमिमं जटामंडलमंडितः ॥ निक्षिप्य पार्वती देवी विष्णावमिततेजसि
नियोज्य भगवान्रुद्रो भैरवं दुष्टनिग्रहे ॥ दत्वा नारायणे देवीं नंदिनं कुलनंदितं ॥ संस्थाप्य तत्र वरदो देवानिंद्रपुरोगमान् ॥
प्रस्थिते च महादेवे विष्णुर्विश्वतनुः स्वयं ॥ स्त्रीरूपधारी नियतं सेवते स्म महेश्वरीं ॥ ब्रह्मा हुताशनः शक्रो यमोन्ये सुरपुंग
वाः ॥ सिषेविरे महादेवीं स्त्रीरूपं शोभनं गताः ॥ नंदीश्वरश्च भगवान् शंभोरत्यंतवल्लभं ॥ द्वारदेशे गणाध्यक्षो यथापूर्वम
तिष्ठत ॥ एतस्मिन्नंतरे दैत्यो ह्यंधको नाम दुर्मतिः ॥ आहर्तुं कामो गिरिजामागमत्तथ मंदिरं ॥ संप्राप्तमंधकं दृष्ट्वा शंकरः काल

॥ राम: ॥
॥ ३५ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुहूर्तरत्नम् नं. ४३७३

विप्रं वटतरोर्मूले ... शिष्या गुरुं वै ॥ गुरोस्तु मौनं व्याख्यानं शिष्यास्तु छिन्नसंशयाः ॥

संवत्सरप्रकरणं ६
तिथिप्रकरणं ८
वारप्रकरणं ९
नक्षत्रप्रकरणं १०
योगप्रकरणं १८
करणप्रकरणं १९
मुहूर्त्तप्रकरणं २०
उपग्रहप्रकर २१
संक्रांतिप्रकर २२
अधिमासलक्ष २४
गोचरप्रकरणं २५
चंद्रताराविबलं २९
लग्नप्रकरणं ३०
संस्कारप्रकरणं ३४
रजोदर्शनम् ३४
गर्भाधानं ३५
पुंसवनं ३५
सीमंतकर्म ३६
विष्णुपूजा ३६
जातकर्म ३६
स्तनपानं ३७
सूतीस्नानं ३७
नामकरणं ३७
निष्क्रमणं ३८
दंतजननफलं ३८
सूर्यचंद्रादर्शनविधि ३८
भूमिउपवेशनं ३८
दोलारोहणं ३८
भूम्युपवेशनं ३८
अन्नप्राशनं ३८
कर्णवेधः ३९
चौलम् ३९
अक्षरविधिः ४२
गृहप्रवेश ४५
दिनेवारः ४५
एकविंशतिदोषाः ४५
पाते ... तिथिवारनक्ष
संक्रांतिदोषः ४६
सग्रहदोषः ४७
कुनवांशदोषः ४७
पापषड्वर्गदोषः ४७
भृगुषड्दोषः ४८
कुजाष्टमदोषः ४८
रिक्तादोषः ४८
वारदोषः ४९
... अपवादः ५०
त्रात्रांतिरेखा ५०
अष्टमलग्न
पापोदोषः ५०
महापातवैधृतदोषः ५१
उदयास्तदोषः ५२
ग्रहणदोषः ५२
पापविद्धाधिष्ठितन ५३
क्षयदोषः ५३
व्रतबंधप्रकरणं ५४
समावर्त्तनम् ५८
छुरिकाबंधनम् ५८
विवाहप्रकरणं ५९
चतुर्थीकाकर्म ६८
वधूप्रवेशः ६८
द्विरागमनं ६९
प्रथमाभिगमनं ७०
घंग ७०
अग्न्याधानं ७०
राजाभिषेकः ७०
यात्राप्रकरणं ७२

सू	चं	मं	बु	गु	शु	श	रा	के	...
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु. र.
१

॥ ॥श्रीगणेशाय नमः॥ ॥श्रीसरस्वत्यै नमः॥ ॥श्रीगुरुभ्यो नमः॥ ॥देहार्द्धासक्तकांतालककुसु
मभयो भालनेत्रानलार्चिर्विश्लिष्टौ ग्रीष्मामौलिशश्वत्स्रवलितसुरधुनीनीररम्यः शिवो नः॥ वंचच्चूडेन्दुकांतिद्विर
दहतिद्दिष्टाच्छादनस्वस्कंधरीतः सोयं भूषास्थिकुंदस्रकरपरिवृतः पातु सर्वर्त्तुरूपः॥१॥ सोमसौम्यभृगुभास्करभौ
मादेवपूज्यरविजावपिभानि॥ यं नमंति निजवांछितसिद्ध्यै सिद्धिदो भवतु मे स गिरीशः॥२॥ ॥ स्वत्रकक्षाक्रमे
णग्रहाः॥ ॥यन्मूर्ध्नि चंद्रकरसुंदरवाहहंससंवाससंकलितपादिव चोपदेव्याः॥ संस्थीयते मनसि मे समलेसह
र्षसेपंकेपाविजयते गिरिजेश्वरस्य॥३॥ ग्रंथं मुहूर्त्तरत्नाख्यं मान्यं मुन्यात्मसूक्तिभिः॥ करोतीश्वरदासाख्यः प्रणम्य
शिवमव्ययम्॥४॥ ग्रंथास्तु केचिन्मुनयां हि दीर्घाः संक्षिप्यपूर्वाथपदास्तु केचित्॥ अत्रातनवर्यं विशदार्थयुक्तं सारं स
वक्ष्मि व्यवहारसिंधोः॥५॥ गोलकसंहितायां यस्य दिव्यज्ञानमतीन्द्रियं यदृषिभिर्प्रोक्तं वसिष्ठादिभिः पारंपर्यवशादिह राम०
स्यमवनीनीतं मकारस्तंप्रपुनः॥ नेतर्द्वेषिकृतं मदुर्जनदुराचाराविरोधामिनेष्या दापुः सुकृतक्षेयोमुनिकृतासीमा १

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मिमामुद्धृतः॥ ॥धर्मशास्त्रे मूलागमेषु सत्स्वेव कृत्रिमं यः प्रकाशयेत्॥ सप्रज्ञाल्पो भवेत्तस्य श्रोतुश्चापि तत्सं
शयः॥ ॥तथा च तन्मूलागमवाक्यानि तद्यो वा न विद्यते॥ यत्रापुषः स्वयाद्वैतोक्तं ग्रंथं नावलोकयेत्॥ पुराणं मा
नवो धर्मः सांगो वेदश्चिकित्सितम्॥ आज्ञासिद्धानि चत्वारि न हंतव्यानि हेतुभिः॥ ॥अथ ज्योतिश्शास्त्रप्रवृत्तिमा
ह वसिष्ठः ज्योतिःशास्त्रमग्रं प्रथमपुरुषतः स्वर्गगर्भाद्विरिंचात्पूर्वं ब्रह्मा लान्तथोपर्यरिवत्समुनिगणप्रार्थनाद्व
त्वकार॥ तद्वेदस्कमसत्रंमृदुपदनिकरैर्गुह्यमध्यात्मरूपं गुह्यं स्वप्रकाशं सहचरितविदां निर्मलं ज्ञानचक्षुः
॥सिद्धांतसंहिताहोरारूपस्कंधत्रयात्मकम्॥ वेदस्य निर्मलं चक्षुर्ज्योतिःशास्त्रमकल्मषम्॥ अथ ज्योतिःशा
स्त्रप्रवर्तकानप्याह नारदः ब्रह्माचार्यो वसिष्ठोत्रिर्मनुः पौलस्त्यलोमशौ॥ मरीचिरंगिरा व्यासो नारदः शौन
को भृगुः॥ च्यवनो यवनो गर्गः कश्यपश्च पराशरः॥ अष्टादशैते गंभीरा ज्योतिःशास्त्रप्रवर्तकाः॥३॥ अथ ज्यो
तिःशास्त्रस्य प्रयोजनमाह वसिष्ठः क्रतुक्रियार्थं श्रुतयः प्रवृत्ताः कालाश्रयास्ते क्रतवो निरुक्ताः॥ शास्त्रादमु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु॰र॰ २ ष्मान्किलकालत्वबोधोवेदांगतासुख्यातरामसिद्धा तथाच यज्ञाध्ययनकर्माणिगृह्यषोडशकर्मच प्रयो
जनंतुविज्ञेयंतत्तत्कालविनिर्णये॥ ॥अथसूक्ष्मस्थूलभेदेनकालोद्विविधस्तयोःस्वरूपमाहसएवका
लएवेश्वरःसाक्षादीश्वरःकालएवसः॥विद्यतेवेश्वरज्ञानीचेत्कालज्ञःसएवचैतस्मात्कालंनजानंतियो
गिनोपिमहीतले॥तथापिदेहिनांनूनंहितायकमलासनः॥भचक्रभ्रमणात्स्थूलंकालंकल्पितवान्प्र
भुः॥प्राणादिदिनमासाब्दयुगांतंचैवभग्रहैः॥शुभाशुभग्रहोत्पातपंचांगतिथिवारजैः॥तिथिनक्षत्रवारो
न४ त्थवारंलत्रपूर्वकैः॥एवमाद्यैर्गुणोद्दोषैर्नित्यंकालःसमन्वितः॥तस्मात्कालगुणान्दोषान्कथयामिपृ
थकपृथक॥ ॥अथकल्पयुगाद्योपाधिककालप्रवृत्तिमाह अत्युत्तः चैत्रसितादेरुदयाद्भानोर्दिनमा
सयुगकल्पाः॥सृष्ट्यादौलंकायांसममंप्रवृत्तादिनेकस्य॥ ॥अथकालमानज्ञानार्थंपरिभाषामुर्वस्यैः राम॰
रविनुमितैरक्षरैःषड्भिःपलंतैर्घटिकाखषड्भिः॥स्याद्वैघटीषष्टिरहःखरामैर्मासोदिनैस्तैर्द्विकुभिश्चव २

2

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्षम्॥ ॥इदमार्हमप्यन्यमानेषुस्वस्वमानानुरोधेनासुकालपूर्वकं गुर्वस्तरोध्वार्यमाणकालस्योपलक्षण
त्वादुपम् अथमानानिवसिष्ठनारदसंहितायाम् ब्राह्मं दैवं मनोर्मानं पैत्रं सौरं च सावनम्॥ चान्द्रमार्क्षं गुरोर्मा
नमिति मानानि वै नव॥ एषां तु नवमानानां व्यवहारोत्र पंचभिः॥ तेषां पृथक् पृथक्कार्यं वक्ष्यते व्यवहारतः॥ ॥
अथ ब्राह्म्यादिचतुर्मानानामतिममानस्य -- प्रयोजनं मानाध्यायेवातिदेः मानं विधातुःखलु नित्यमायुः
प्रमाणविज्ञानविधौ च कार्यम्॥ गीर्वाणमन्वोरपि मानमेवं पैत्रं च मानं शशिनः प्रवृत्तम्॥ पक्षद्वयं जन्ममभवा
दिकानां फलं च सर्वं गुरुमानतः स्यात्॥ ॥तथा च सौरादिपंचमासमानानां स्वरूपं तत्रैव सौरं च संक्रान्तिवशाद्दिनस्य
नाक्षत्रमिंदोर्भगणभ्रमाच्च त्रिंशद्दिनं सावनमानमाघतिथ्यैर्मानं खलु चान्द्रमानम्॥ सावनदिनं तु "सावनंस्यादि
नं भानोरुदयादुदयं भवेत् तदेव भूदिनं वारस्तदीशो कोदयादितः। अस्मिन्दिने ऽसवः २१६५८० वा गीशावर्षसुद
तं गुरुराशिभोगादत्रोक्तं वत्सरं शारदादि मितिविकल्प्या अथ सौरादीनां स्वस्वकृत्योपयोगः तथा च वर्षमानादैर्वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु॰ १॰ ३ वाह्यादौ स्मृतः सौरो यज्ञादौ सावनः स्मृतः आब्दिके पितृकार्ये च मासश्चान्द्रोऽभिधीयते वसिष्ठश्च दिनप्रमाणान्वेय
नादिसर्वसंक्रान्तिकालस्य विनिर्णयश्च कृत्वादिमानं निखिलग्रहाणां पक्षमे सौरेणाविशुद्धतेनतत् तथाचार्कवार
ध्यायेव॰ अथार्कवाराज्जगतः शुभाशुभं स्यान्नाधिमासेतरमासनिर्णयः॥ ३ द्वादशसंक्रान्तिदिनाद्ये निश्चयः सर्वः प्र
पंचो भवतीह निश्चयात् सौरमासस्तु सायननिरयनभेदेन द्विविधस्तथा च नारदः संक्रान्तेः पुरतो भानुस्सृजाया ३
वद्विंशकैः रवेरयनसंक्रान्तिस्तदा तद्राशिसंक्रमः सायनकालिकं ते दिनरात्रिप्रमाणानां निर्णयश्चलसंक्रम
त् १॰ ततः सकलकर्माणि पुण्यानि चलसंक्रमः अचलसंक्रान्त्यायनं मुहूर्ते चिन्तामणौ अथायनांशाः
रवेरसाद्वतांश्च सप्ताकं मन्या विहृतादिनाद्यैः मेषादितः प्राक्चलसंक्रमाः स्युर्दाने जपादौ बहुपुण्यदास्ते अथा
यनांशानयनं तत्र श्रीज्ञानव वेदाब्धिवेद ४४४ हीना नृशका स्वरसभाजिताः॥ अयनांशा भवन्त्येते वृद्धपक्षिप्र रम॰
ताः किल॥ ॥ तत्र सिद्धान्ते तत्संस्कृतार्काद्धि क्रान्तिछायाचरदलादिकम् स्फुटं दृक्तुल्यतां गच्छेदयने वि ३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुवह्नये इत्यादिवाक्यैरत्रव्यवस्था दिनप्रमाणार्थमयनगोलक्रांतिछायाचरदलग्रहास्तोदयादिदृग्गणितोपयुक्ता
विलकर्मणि तथा वृद्धपुरापजनकार्कसंक्रमणानि सायनेनभवंति तथैव शुभाशुभफलोपयुक्तः सौरमासःकर्म
णि विवाहोपनयनादौ निरयनार्कसंक्रमणोनभवंत्येतद्विषयकनिरयननिषेधवाक्याभावाल्लोकव्यवहाराच्च
अपनाख्यत्रमासोपिद्विविधः एकस्तुसिद्धांतसार्वभौमे चंद्रस्यभगणभोगादार्क्षमासंवदंतिकेचित् तत्संहिता
स्कंधोक्तगणितादौ नप्रयोजनाभावात् एतस्यप्रयोजनम् मा१० प्रवर्षणांमेघगर्भनाक्षत्रेभगणाक्रमे। अपर
स्तु उदितंपुनर्यावत्तोदेति धिष्ण्यं तदार्क्ष्येदिनमानमस्यैतदुक्तम् दिनैरीदृशैर्मासपूर्त्तिः खरामैर्दिनाश्चांग६० मा
णो घटीमानमार्क्ष्यम् एतस्यप्रयोजनं घटीज्ञानार्थमेव इयमार्क्ष्यघटीतु जलघटीमानमिताभवति अत्राब्दे
सवा२१६०० भवंति अथ सावनस्यप्रयोजनम् नृगर्भवृद्धिः प्रसवर्तुकालोपसूतकाघं खलु सावनेन अत्र
यवादस्यप्रयोजनम् तत्रैव उद्वाहयज्ञोपनयप्रतिष्ठातिथिव्रतक्षौरमहोत्सवाघम् पर्वक्रियावास्तुगृहप्रवे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शपूर्वेवचांद्रेणविशतयतेतत [illegible]पिद्विविधः तथाच[illegible]तरे पौर्णमास्यवसानःस्यान्मासोदेवकृतेस्तथा दर्शां
तोमानुषोहीतोविंध्यादुत्तरयाम्यगो [illegible]कादीनांल्लक्षणाम् [illegible] सौम्यायनंमासषट्कं मृगाद्यंभानुभुक्तितः स्वहः
सुराणांतद्रात्रिःकर्काद्यद क्षिणायनम् [illegible]यदयनवशेनाहोरात्रमुक्तंतत्फलादेशार्थमेव वस्तुतस्तत्प्रारंभमाह
[illegible]सुरघुरात्रंसौराहंमेषतोलियसूर्यतः चांद्रोमासःपितृदिनंकृष्णाष्टम्यूर्द्धतोभवेत श्रीपतिः मृगादिराशिद्वयभानु
भोगात्षडृतवःस्युः शिशिरोवसंतः ग्रीष्मश्चवर्षाचशरच्चतद्वहेमंतनामाकथितोत्र षष्ठः इदंसौरमयनादिकं
सायनार्कतोवसेयम् [illegible]मानेनायन[illegible] द्वौद्वौमावाद्यिमासौस्यादृतुस्तैरयनंत्रिभिः अयनेद्वेगतिरुद
ग्दक्षिणार्कस्यवत्सरः समरात्रिंदिवेकालेविषुवद्विषुवच्चतत [illegible] मधुस्तथामाधवसंज्ञकश्चशुक्रःशुचिश्चाथ
नभोनभस्यौ तथेषऊर्जश्चसहःसहस्यौतपस्तपस्याविति चैत्रतस्ते [illegible]मासाः सिद्धांत[illegible] यस्मिंश्चांद्रेकविद
पिवभानोस्तुमेषसंक्रांतिः ज्ञेयःसचैत्रमासोवैशाखाद्यास्तथैवस्युः [illegible]दिमासाभिप्रायेण[illegible]० यस्मि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्मासे पौर्णमासीयेन धिष्ण्येन संयुता तन्नक्षत्राह्वयो मासः पौर्णमासी तथाह्वया तत्पक्षौ देवपित्राख्यौ शुक्लकृष्णौ
च तावुभौ शुभाशुभे कर्मणि च प्रशस्तौ भवतः सदा ॥ गृहप्रवेशे विवाहप्रतिष्ठामौञ्जीबंधनम् माघादौ मंगलं कर्म वि
धेयं चोत्तरायणे याम्यायनेऽशुभं कर्म मासप्राधान्यमेव च अथ संवत्सरानयनम् विक्रमादित्यराज्याद्वै पंचत्रिंशोत्त
१३५ रं शतम् पातयित्वा भवेच्छाकस्तेन शुक्लादितो गतः शाकोनवाद्रीन्दुकृशानु ३१७९ युक्तः कलेर्भवेत्स द्युगणाख्य
वृन्दः युगांगसमाग्नि ४७६४ विहीन एष ग्रंथाद्वृन्दः स भवेत्तु पातः अथ प्रभवादिसंवत्सरानयनम् शाकः
सार्कः १२ खषट् ६० तष्टो रेवाया दक्षिणे भवेत् संवत्सरोऽस्मद्देशे स्यात्स एव तिथिसंयुतः अत्र पूर्वसंवत्सरो वर्त्त
मानः उत्तरसंवत्सरस्तु शाक १५९५ पर्यंतं वर्त्तमानस्तदनंतरं शाक १६०० पर्यंतं गतस्तदनंतरं शाक १७६५ पर्यन्तं सं
को गतः अग्रेऽप्यधिको गत इति ज्ञेयम् नूनं नर्मदोत्तरभागे स्याद्गुरुमानेन वत्सरः नर्मदायाम्यभागे तु मनुमा
नेन वत्सरः मनुमानं तु चैत्रशुक्लप्रतिपत्सूर्योदयमारभ्य द्वितीयतादृशसूर्योदयपर्यंतं वर्षात्मकं ज्ञेयम् गु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तमानं च गुरोर्मेषराशिभोगकालो वर्षात्मको ऽतो गुरोर्मध्यमं मानेन राश्यादिक्रमगकाले पूर्वोत्तरसंवत्सरयोः क्रमे
णानिवृत्तिप्रवृत्ती ज्ञेये ॥ मासेषु चोज्ज्वादिषु कृत्तिकादि द्वयं द्वयं चक्रमध्योद्धिभी स्यात् त्रिभोनभस्पेषु तपस्यमासाः
सुक्तोनयुक्तसेवशादजस्रम् उदेति धिष्ण्येन सहैव मंत्री येनैव तन्नाम भवेच्च वर्षम् ज्ञेयानि तत्कार्त्तिकपूर्वकाणि भ
वंति तेषां च फलानि सम्यक् ॥ श्री० तपस्विवल्पुपदासावुऊसंपातिमासि प्रथमलवगतः सन्वासवेवासवेऽस्यः निखि
लजनहितार्थं वर्षवृंदे वरिष्ठः प्रभव इति स नाम्ना जायते हृस्तदानीम् ॥ प्रभवो विभवः शुक्लः प्रमोदोऽथ प्रजापतिः अं
गिराः श्रीमुखो भावो युवा धाताऽतथेश्वरः बहुधान्यः प्रमाथी च विक्रमो वृषवत्सरः चित्रभानुस्सुभानुश्च तारणः पार्थि
वोऽव्ययः सर्वजित्सर्वधारी च विरोधी विकृतः खरः नंदनो विजयश्चैव जयो मन्मथदुर्मुखौ हेमलंबी विलम्बी
च विकारी शार्वरी प्लवः शुभकृच्छोभकृत्क्रोधी विश्वावसुपराभवौ प्लवंगः कीलकः सौम्यः साधारणो विरो
धकृत् परिधावी प्रमादी स्यादानंदो राक्षसो नलः पिंगलः कालयुक्तश्च सिद्धार्थी रौद्रदुर्मती दुंदुभी रुधिरो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऽरीरक्ताक्षीक्रोधनःक्षयः॥ इयंहिषष्टिःपरिवत्सराणांबृहस्पतेर्मध्यमराशिभोगात् उदाहृताःपूर्वमुनिप्रवर्यै
र्नियोजनीयागणनाक्रमेण एतेस्वनामसदृशफलदाः अब्दैर्युगंपंचभिरब्दपस्ययुगानिचद्वादशवैभवंति
पंचाब्दनाथाःक्रमशोयुगस्यवह्न्यर्कचंद्राब्जजशंकराःस्युः कृष्णःसुरिज्जिष्णुर्दहनस्त्वष्टाचाहिर्बुध्न्यपितरः
विश्वेचंद्र [redacted] स्त्विंद्रज्वलनोनासत्याख्योभगस्त्वपरः [redacted] इतितुद्वादशयुगानांस्वामिनः मंधांतरे वै
न्नादिमेषचापार्द्रतुलाकर्कटकेषुच नृपमंत्रीधान्यमेघरससस्याधिपाःक्रमात् व्ययवर्षादीनांविशेप
कान्यत्तम् त्रिघ्नशकाब्देमुनिभिर्विभक्तेद्विघ्नेहिशेषंशरयुक्तवृष्टिः धान्यन्टरांशीतमथोष्णवायुप्रजासमृ
द्धिःक्षयरोगविग्रहो उग्रंचपुण्यंपरतस्तुपापंक्रमेणलब्धाकुकवत्सराब्द निरीक्ष्यसम्यक्फलमतिवृष्टमेवस
र्ववदेज्ज्योतिषिकःपुनश्च स्वस्वाभिवर्षाधिपवत्सरैक्यंत्रिघ्नंशराढ्यंतिथिभक्तशेषम् स्थायोष्टलाभ्यहिग्गुणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मु·र· प्राग्ज्योतिषमुहूर्त्ताशेषमितोप्ययस्व   इति श्रीमद्ज्योतिषरायात्मजेश्वरदासविरचिते मुहूर्त्तरत्ने संवत्सरप्र
६६ करणम् ॥ अथ तिथिप्रकरणम् ॥ श्लो० हृद्धिः सुमंगलपदा च बला खला च लक्ष्मीवतीत्यथ यशाप रतक्तमि
त्रा तद्वद्बलास्तु महती तिथिरुग्रकर्मा ॥ प्राक्षिलामतिपदादित एव नंदा तिथिपास्त्वनुमुखविधातृविघ्नचोयम
शीतदीधितिविशाखवज्रिणः वसुनागधर्मशिवतिग्मरश्मयो मदनः कलि तदनु विश्व इत्यपि तिथौ हि दर्श
संज्ञिते पितृनुशांत्यधीश्वरान् त्रयोदशी तृतीययोः स्मृतस्तु विनयोपरैः वह्निर्विरंचो गिरिजा गणेशः फणी विशा
खो दिनकृन्महेशः दुर्गान्तको विश्वहरिस्मराश्च शर्वः शशी चेति पुराणदृष्टाः ॥ श्लो० नंदा भद्रा जया रिक्ता पूर्णेति च पु
नः पुनः शुक्रज्ञारार्किजीवेषु सिद्धाः स्फुरत्तिथयः क्रमात् ॥ श्लो० ह्यादित्यभौमयोर्नंदा भद्रा शुक्रशशांकयोः जया ज्ञे 6
च गुरौ रिक्ता पूर्णा कौर्वाग्मृताः शुभाः ॥ गुणान्निरूप...पिच० नंदा भौमार्कयोर्भद्रा सुकेन्दौ स्याज्जया बुधे शुभयो राम०
गा गुरौ रिक्ता पूर्णा मंदेऽमृताह्वयाः ॥ केश्चिदज्ञानपदार्थैरेते स्वसुयोगा लिखितास्तदसत्संहिताविरोधात् स सर्वकु ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वार्क्योः सप्तमीषष्ठीचंद्रेभानौचतुर्थिका द्वितीयाष्टमीजीवेनवमीशुक्रवासरे श्चविकित्साभादशोगामंगले
वतिनिंदिताः भगंदराश्मरीकुष्ठक्षयरोगप्रदायकाः यद्विविष्टिर्व्यतीपातोदिनंचाप्यशुभंभवेत् हन्यतेमृतयोगेन
भास्करेणतमोयथा श्री० नंदासुचित्रोत्सववास्तुतंत्रक्षेत्रादिकुर्वीततथैववन्त्रम् विवाहभूषाशकटाध्वयानं
भद्रासुकार्याण्यपिपौष्टिकानि जयासुसंग्रामबलोपयोगिकार्याणिसिद्ध्यंतिहिनिर्मितानि रिक्तासुविद्विड्वधबं
घातविषाग्निशस्त्रादिचयातिसिद्धिम् पूर्णासुमांगल्यविवाहयात्रासपौष्टिकंशांतिककर्मकार्यम् सदैवदर्शेपि
तृकर्ममुक्तान्यद्विदध्याच्छुभमंगलादि २० नवम्यामथ्यपुक्ष्मस्तेललक्ष्मीदेवींसमर्चयेत् सरस्वतींमापु
धानियुद्धेजयमवाप्नुयात् विजयादशमीतत्रसर्वकार्येषुनिंदिता यात्रायांजयदाराज्ञांसम्यक्संपत्प्रदानृणा
म तिथिःपंचदशोभागःपक्षयोःस्यात्क्षणातिथिः यत्क्षयोकिंतिथौयस्यांतस्यांतदक्षितंभवेत् श्री० तिथिक्ष
युग्मात्खलुपक्षरंध्रं भवेद्द्वितीयांदशमींविहाय दर्शेचतासांविषमावरिष्ठास्मृतामुनीन्द्रैर्नवमीविहाय २० कलि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मु०र० ७ १४वसु८गराविति४पराम्युख६हा१२रिद्गौर्दितिथिवृपक्षरंध्रास्क ग्र२ पमनु१४वसु८गोर्दश१०पंचास्त्रिस्मवि
हीनास्पनाडिकाःशुभदाः श्री० एकान्तरादिनकरेतिथयोद्वितीया पूर्वाषनुःसफयोर्वृषकुंभयोश्च कर्कोजयोश्च
मिथुनावलेयार्मृगेन्द्रकीटयोःकलामकरयोश्च भवंतिदग्धाः व० मास१२रुद्र११दिशा१०रामाः३षट्६पक्ष२मुनय
७स्तथा दहन्तेतिथयःसमवारैःसूर्यादितःक्रमात् युक्तिस्तिथयोवारेष्वेकस्मिन्सोवमाभिधः तिथिर्वारस्त्रये
रू५ ष्वेकास्त्रिपुस्पृं द्वेवानिंदिते एतेवारतिथीसमयेएवत्याज्ये श्री० तिथेश्चवारस्यवयत्रसंख्यायात्रयोदशास्युर्मि
लितेकृतेसति सएवयोगःक्रकचाभिधानकोविवर्जनीयःशुभकर्मसु [illegible] क्रवम् सप्तम्यादिनकरवास
रेयदिस्याद्वारश्चेत्स्मातिपदिचेन्नुतंदनस्य संवर्तोमुनिभिरुदीरितःसयोगःसंत्याज्यःशुभफलकांक्षिभिःप्र
यत्नात् व० प्रतिपद्यंवनस्तत्रैत्रयोदश्यर्यमर्क्षयोः नक्षत्रत्रुटितोयोगोदेवानामपिनाशदः श्री० चतुर्द राम० ७
श्यष्टमीचैवअमावास्यापूर्णिमाः पर्वाण्येतानिराजेन्द्ररविसंक्रमणंतथा मार्गशीर्षेचपौषेचमाघेप्रौष्ठे

बर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

धू८

च फाल्गुने कृष्णपक्षेषु वेधुरन्वष्टक्यं स्तथाष्टकाः" दर्शान्तमासाभिप्रायेणेदम् यदा कृष्णत्रयोदश्यां पितृभे
न्दुः करे रविः गजच्छाया तदा ज्ञेया पितॄणां भूरितृप्तिदा मासि मार्गशिरस्यैव व्रतानां समुपक्रमम् अखण्ड
यां तिथौ कुर्याद् नस्ते गुरुशुक्रयोः ना० सूर्यास्तमयपर्यन्तं यस्मिन्वारे पिपा तिथिः विद्यते सा त्वखण्डा स्यान्न्यूनाचे
त्खण्डसंज्ञिता वसिष्ठश्च उपेत्य स्तमवाप्यार्कोमुहूर्तत्रयवाहिनीम् यां तिथिं स्यादखण्डा सा न्यूना चेत्खण्डसंज्ञि
का अन्यत्रापि आदित्योदयवेलायामारभ्य षष्टिनाडिकाः अखण्डा इति विख्याता हरिवासरवर्जिताः अन्यथा च
खण्डा इति श्रीपतिः ह्यासिवत्तं पर्वस्त्रपतमध्ये मासं च षष्ठीषु च सर्वे तैलम् नृणां विनाशाय चतुर्दशीषु क्षुरक्रि
या स्यादसकृत्तदाप्सु पञ्चपर्वसु नन्दासु न कुर्याद्दन्तधावनम् तत्र कुर्याद्दन्तादन्त्यसनरोगविधिर्हन्तकः [illegible] कामदुर्गोक्त
कविधिनष्टेह्नु कदिनेषु च सकृदामलकस्नानं सपत्पुत्रविनाशकम् पञ्चपर्वसु पाते च ग्रहणे चन्द्रसूर्ययोः नर स्नात्वा
त्ययोनिः स्यात्तैलस्त्रीमांससेवनात् ३३ नृपं अनुक्तवारतिथिषु तन्मायां विष्टिपातयोः अत्रौषधेन सुतैलं न दुष्य

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु.र.
८

ऊहत्तांविना ॥०॥ ईषेचशुक्लनवमीकार्त्तिकेद्वादशीसिता मासद्वयेतृतीयास्याच्चैत्रेभाद्रपदेपिच अमावास्या
श्रावणेचवैशाखेकादशीसिता आषाढशुक्लनवमीमाघमासेतुसप्तमी कृष्णाष्टमीनभस्येचआषाढीकार्त्ति
कीतथा फाल्गुनेचैत्रमासेचज्येष्ठमासेचपूर्णिमा मन्वंतरादितिथयःपुण्याःस्युःपितृकर्मणि तासुजप्तंहुतं
दत्तंफलंभवतिचाक्षयं अथयुगादयः तत्रैव नवम्यांशुक्लपक्षस्यकार्त्तिकेनिरपात्कृतम् चैत्रासितत्रती
यायांवैशाखेसमपद्यते अमायांमाघमासस्यप्रवृत्तं द्वापरंयुगम् कलिःकृष्णत्रयोदश्यांनभस्येमासिनिर्ग
तः धर्मशास्त्रे ज्येष्ठमासिसितेपक्षेदशम्यांबुधहस्तयोः गरानंदेव्यतीपातेकन्याचंद्रेवृषेरवौ दशयोगेन्न
रस्नात्वासर्वपापैःप्रमुच्यते अमार्कश्रवणव्यतीपातयोगःस्यात् पौषमाघयोः अर्द्धोदयःसविज्ञेयःकिंचिन्यूनो र३
महोदयः कूष्मांडेबृहतीक्षारंमूलकंपनसंफलम् धात्रीशिरःकपालांत्रनखचर्मतिलानिच क्षौरकर्माङ्ग राम०
नासेवांप्रतिपत्प्रभृतिस्त्यजेत् इतिश्रीनन्दज्योतिषरायात्मजेश्वरदासविरचितेमुहूर्त्तरत्नेतिथिप्रकरणम्॥ ॥ ८

४

अथवारप्रकरणम् वसिष्ठः रविः स्थिरः शीतकरश्चरश्च महीजउग्रः शशिजोविमिश्रः देवेन्द्रपूज्योलघुसिं
द्धशत्रुपूज्योमृदुस्तीक्ष्णतनुश्चसौरिः पूर्णेन्दुशुक्रज्ञसुरेज्यवाराः सर्वेषुकार्येष्वतिशोभनास्तेयेस्वपिसूर्यात्मजा
भौमवाराः प्रोक्तेषुकार्येषुसुपूजितास्ते रक्तवर्णोरविश्चन्द्रोगौरोभौमस्तुलोहितः दूर्वावर्णोबुधोजीवः पीतःश्वे
तस्तुभार्गवः कृष्णःसौरिःस्ववारेषुस्वस्ववर्णाक्रियाःशुभाः लाक्षाकौसुंभमांजिष्ठरागैर्कःस्वर्णकाचयोः भौम
स्यंद्रस्यमुक्ताद्येशनिर्लोहाश्मनोमतः राज्याभिषेकोत्सवमंगलाश्वसेवाहवाहौत्रपक्षचित्रकर्म धातुक्रियाभू
षणाचर्मलाक्षाधान्योरिकोष्ट्रादिरवौविदध्यात् मुक्ताम्बुशङ्खस्फटिकेक्षुरोप्यक्षीरोषधीधान्यकृषिक्रि
याघ्नम् स्त्रीनृत्यगीताखिलवास्तुकर्मशशांकवारे रविवासरोक्तम् विषाग्निशस्त्राहवभेददंभस्तेयाऽनृतेऽश्मा
सवबंधकर्म छेदप्रवालाखिलधातुकर्मतथाभिचारंचकुजेह्निकुर्यात् नेपथ्यवादाहवशिल्पसंधिव्यायामप
रायाखिलत्नेवनाद्यम् धातुक्रियाविद्रुमभूषणाद्यंबुधेह्निकुर्यादशितमपंचम् यज्ञक्रियामंगलपुष्टिविवाहमां

मु.र.
९

वरोद्यानविभूषणाद्यं भैषज्यशस्त्राहवगीतनृत्यचरं स्थिराख्यं सुरपूजिते हि स्त्रीगीतमुक्ताफलवस्त्ररौप्यसुगंधश
य्यांवरभूषणाद्यम् उद्यानकृष्यंबुजशास्त्रपण्यमांगल्यपुष्पादि सिते हि कुर्यात् समस्तवास्तुग्रहणाश्मसीसदा
स्त्राग्निपुष्ट्यैश्वर्यगृहादिकर्म स्वरो हि गोहेमतुलायमेष्टुपापानृताद्यं रविपुत्रवारे भरणीचित्राविशाखास्वपवसर्पमनगा
रिषु पौष्णमेषकर्कवारादिषु कोदिग्रहजन्मभम् जन्मर्क्षग्रहसंयोगेन कुर्यात् शुभकर्मैव पापिग्रहणाद्यात्रादिषि
नाशमुपयांत्यतः अथ वारप्रवृत्तिर्यथा उदयादुदयाद्भानोरिति पूर्वैर्विनिश्चितं देशांतरचराद्भाभिर्नाडीभिरप
राभवेत् तथाच पादोनरेखापरपूर्वयोजनैः पलैर्युतोनास्तिथयोदिनार्द्धतः ऊनाधिकास्तद्विवरोद्भवैःपलैश्च
र्द्धतथाधोदिनप्रवेशनम् वारेति० वारप्रवृत्तेर्घटिकादिनेशात्कालाख्यहोरापतयः क्रमेण सार्द्धेननाडीद्वि
तयेनषष्ठः षष्ठश्च षष्ठस्य पुनः पुनश्च अत्रायमर्थः वारप्रवृत्तेर्घटिकाः सार्द्धद्वयनाडीभिर्गणनीयास्तत्र होराप्रथ
मा वाराधिपस्यैव ततो वाराधिपात्षष्ठस्य द्वितीयाततः षष्ठस्य तृतीया एवमनेन क्रमेणाग्रिमवारप्रवृत्तिकालावधि

अन्यच्च॥ रेखास्वदेशांतरयोजनैः पलैर्निजांघ्रिहीनैः शरवेदघघ्नः॥ पुनोनिताः प्राग्परतोदिनार्द्धयुक्ताः स्फुटैस्तैर्दिनप्रवेशः॥१॥

रम०
९

9

गणनाकार्यो वारप्रवृत्तिविज्ञानं क्षणवारार्थमेव हि अखिलेष्वन्यकार्येषु दिनादिरुदयाद्भवेत् क्षणवारः कालहो
राख्यः श्री० यस्य ग्रहस्य वारे यत्कर्म किंचित्प्रकीर्त्तितम् तत्तस्य कालहोरायां सर्वमेव विधीयते व० बलप्रदस्य ग्र
हवासरे यच्चोद्दिष्टकार्यं समुपैति सिद्धिम् सद्बलस्य ग्रहवासरे तत्प्रयत्नपूर्वं तपिनैव साध्यम्॥ ॥इति श्रीमज्ज्यो
तिषरायात्मजेश्वरदासविरचिते मुहूर्त्तरत्ने वारप्रकरणम्॥ ॥अथ नक्षत्रप्रकरणम् नक्षत्राधीशाः श्रीपतिः
मेशादस्त्रयमाग्निधातृशशिनः शर्वोदितिर्वाक्पतिः रुद्रजाः पितरो भगोर्यमरवी त्वष्टाह्वयो मारुतः शक्राग्नी
त्वथ मित्र इन्द्रनिरृती तोयं च विश्वविधिगोविंदो वसवोंबुपाजैकचरणाहिर्बुध्न्यपूषाभिधाः अथ नक्षत्रयोनयः
अश्वेभमेषभुजगाह्वयकुक्कुरोतुमेषोतुमूषकमथैंदुरगोल्लुलायाः शार्दूलमाहिषमृगारिमृगद्वयंश्वाकीशोद्दिव
भ्रुकपिपंचमुखाश्वसिंहाः गोकुंजराविति यथाक्रममश्विभादिभानां भवंति खलु कल्पितयोनिरूपाः वभ्रूरगं श्वे
णाभिभेंद्रसिंहमोतुंदुरं स्याच्चजवानरव गोव्याघ्रमश्वोत्तममाहिषं च वैरं न्तनायौदेपभस्त्ययोश्च अन्येषु वित्र

मु.र.
१०

क्षत्रेषुपौष्णेयार्षपोर्योस्तिभेदः तयोः शर्वमताराम् श्लो० चरंचलंक्रूरमुग्रंतिचोसंज्ञंस्थिरंदारुणाख्यंतीक्ष्ण
म क्षिप्रंलघुकंमृदुमैत्रसंज्ञंसाधारणंमिश्रमितिब्रुवंति ३० स्थिरसंज्ञंभचतुष्टयंध्रुवंजर्क्षंसुत्तरात्रितयम् नर
पतिपत्तनसद्देनप्रवेशवीजादिसिद्ध्यै तेतत्र दारुणभानिपुरंदरकोणपशिवसर्पदैवानि दारुणावंधनदहेनम
हरणकर्माणितेषुसिद्ध्यंति पूर्वात्रितयंपितृभसुधाख्यमिदंपंचकंयाम्यम् मारणबंधनभेदनविषदहेनप
चकेकार्यम् सुरसचिवाश्विनहस्तास्ताराःस्युःक्षिप्रसंज्ञकास्तासु श्रौपधपण्यविभूषणशिल्पस्त्नताज्ञान
कर्मसिद्धिःस्यात् मृदुवृंदंभचतुष्टयमंत्यत्वाष्ट्रशशिस्रोत्पमित्रक्षेम् मंगलवनिताभूषणमंदिरगीतादिसिद्ध्यै
तेतत्र भद्वितयंश्वसनसखवेदाग्निभमिश्रसंज्ञंस्यात् निखिलानिचसाधारणकार्याणिपुण्यानितत्रकार्याणि
मृदुवृंदेकथितान्यपिस्थिरवृंदेनानिकार्याणि चरधिष्ण्यकथितान्यपिकार्याण्यखिलानि लघुगणेनूनम्
पधद्दारुणमोक्तेतत्कार्यंतथोग्रभेकार्यम् साधारणवृंदोक्तंयत्कर्मोघंभवेत्क्रूरे निखिलेचधिष्ण्यवृंदेषुनिभः

रामः
१०

10

सा मान्यकार्यमित्युक्तम् यद्यस्य करणमुक्तं तदेव सुखं विजानीयात् ॥ श्री० मूलाग्नेयमघाद्विदैवभरणीसा
र्पाणि पूर्वात्रयं ज्योतिर्विद्भिरधोमुखं हि नवकं भानामिदं कीर्तितम् वापीकूपतडागगर्त्तपरिखाखातो निधेरुद्धृ
तिः क्षेपो घृतविलप्रवेशगणितारंभादि तत्रेष्यते ज्येष्ठादित्यकराश्विनीमृगशिरःपौष्णानुराधानिलत्वाष्ट्राख्या
नि वदंति भानि मुनयस्तिर्यङ्मुखान्येषु तु अश्वेभोष्ट्रलुलायरासभवृषैरश्रादिदंताश्विनौजंत्री यंत्रहलप्रवाहेग
मनारंभाः प्रसिद्ध्यंति च पुष्यार्द्राश्रवणोत्तराशतभिषक्ब्राह्म्यश्रविष्ठाह्वयान्यूर्ध्वास्यानि नवोदितानि मुनिभिर्धि
ष्ण्यान्यथैतेषु तु प्रासादध्वजधर्मवारणगृह प्राकारसत्तोरणोद्यानारामविधिर्हितो नरपतेः पट्टाभिषेकादिव
॥ ॥ ...कं नक्षत्रकृत्यानि न लिखितानि साधारणोत्तोक्तत्वात् ॥ रोहिण्याहियाम्यानिलवारुणेंद्रासार्पाद्र
र्ज्ञधिष्ण्यानि तथाहुरहंति क्रूरवदिद्वैवादितिभानि तूनं समानि शेषाणि पुनर्मुनीन्द्राः ॥ श्री० तेषां प्रमाणं घटिकास्त्रि

घटिकाः २

शत्तु वतिषष्ट्यथ ॥ श्री० बृहत्सु वास्यं कुरुते समर्घं जघन्यधिष्ण्येषु दिनेऽमहर्घं समेषु धिष्ण्येषु समं हि मासु

मु॰र॰ ११ वेदंत्पसंदिग्धमिदंमहांतः॥ ॥अर्कार्किभौमवारेषु भद्रायां विषमांघ्रिभे त्रिपुष्करस्त्रिगुणादो द्विगुणो यमलांघ्रि
भे [illegible] अंधकं नेदनुमंदलोचनमध्यलोचनमतः सुलोचनम् रोहिणीप्रभृतिभिश्चतुर्विधैर्नूनमष्टगणयेत्पुन
श्च पुनः लाभेंधके निकटएव हृतस्य चौरैर्दूरगस्य लभिरिहके करेमे प्रयत्नात् दूरस्थितिश्चिपिटमेनतु तन्न नाभि
नेत्राभिरुत्तमविलोचनमेकदाचित् [illegible] क्रूरविद्धयुतोवापि पुष्योयदि बलान्वितः विनापाणिग्रहं सर्वमंगले
ष्विष्टसिद्धिदः॥ [illegible]ः परकृतदोषंनिखिलंनिहन्ति पुष्यः परो न पुष्यकृतम् द्वादशानेधनगेदेवलवान्पु
ष्यस्त्वभीष्टदः सततं॥ मृगराजमध्ये सिंहउगराशेमध्ये तथैव पुष्यस्य तिजबलंस्मृहतोप्येवंविविधोत्पातेन्न
शक्तिमान्निहन्तुः प्रत्यरिनैधनसंज्ञो विपत्करो वाथ जन्मसंज्ञो वा पाणिग्रहणां मुक्त्वान्ते सर्वार्थदः पुष्यः अथ
नक्षत्रस्वरूपाणि [illegible] तुरगमुखसमानरूपयोन्याकारं तु नापितक्षुरवत् सुरगृहसदृशं शाब्धन्मस्तकसदृशं मृगसे राम॰
व मणिनिभमोक्कः सदृशं प्रदुदपेन्दुनिभं कुलालचक्राभम् प्राकारनिभं शय्याहस्ताकारं च मौक्तिकाकारम् रक्तनि ११

ंतोरणवद्वृत्तिसदृशं कुंडलाकारम् केसरिविक्रमसदृशं शय्याकारं गजेंद्रवेलासम् शृंगाटकत्रित्रिक्र
मम् दंतवृत्तीनियमलयुग्माभम् वरशय्यासदृशमतः फलसदृशं मातुलिंगस्य स्वस्वमुखताराकाराणांक
थितानीमानिस्वरूपाणि दैवविदखिलंसम्यग्ज्ञात्वासर्ववदेन्नित्यम् पूर्वोत्तरफाल्गुन्योर्मिलित्वाशय्याकृ
तिरितिज्ञेयम् अथताराकासंख्या गुणा३ गुणा३ ऋतु६ पवन५ गुणो३ दु१ कृता४ त्रि३ पवन५ शराः५ द्विर
भुज२ शरे५ द्वि१ दु१ युग४ युगा४ त्रि३ रुद्रा११ ब्धि४ वह्नि३ गुणाः३ वेद४ शत१०० द्वि२ द्वि२ रदा३२ दस्रादीनां
चताराकासंख्या हृतनष्टादिषुकार्यंताराकासंख्येः पृथक्पृथग्रूपैः ॥०॥ याहृश्यपतेदीप्ततारा स्वगणोदीप्ततारका
॥०॥ पौष्णाश्विन्योः सार्पपित्र्यर्क्षयोश्च यच्च ज्येष्ठामूलयोरंतरालम् तद्गंडांतं स्यान्नवतुर्नाडिकं हि यात्राजन्मोद्वा
हकालेष्वनिष्टम् ॥०॥ ज्येष्ठान्त्यपादघटिकाद्वितयेन सार्द्धं मूलादिमाः परिहरेदिह जन्मभाजम् भुजंगपौरंदरपौ
ष्णभानांतदग्रभानां च यदंतरालम् अभुक्तमूलं प्रहरप्रमाणं त्यजेत्सुतं तत्र भवां सुतां वा ॥०॥ ज्येष्ठान्त्यांस्या

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मु०र०
१२

नाडिकावेदतुल्यामूलाद्युन्यानारदोऽभुक्तमूलम् तद्द्वैकानाडिकेद्वे वसिष्ठस्तद्वत्राद्यंह्यजगौदेवपूज्यः श्री० स्व
भुक्तमूलसंभवं परित्यजेत्पबालकं समाष्टकं पिताथवा नतन्मुखं विलोकयेत् तदाद्यपादके पिता विपद्यते जनन्य
थ धनक्षयस्तृतीयके चतुर्थके शुभावहः ॥ मूलस्य प्रथमे पादेन पश्येत् समाष्टकम् द्वितीये तु चतुष्कस्यात्तस्य
वत्तृतीयके षण्मासांस्तु चतुर्थे स्यात् दर्तेसुखभाजनः सर्वेषां गण्डजातानां परित्यागो विधीयते नातेनादर्शनं का
र्यं यावत्षाण्मासिकं भवेत् श्री० प्रतीपमन्यथादतः फलं तद्वत्सर्पिभे तदुक्तदोषशान्तये विधेयमत्र शान्तिकम्
मु०चिं० स्वसृविनाशमहिजोसुतरां विधत्तः कन्यासुतोनिऋतिजोऽग्रजमंहतस्थ ज्येष्ठाभजात तनया स्वधवाग्रजं
च शक्रभिन्नजो भवति देवरनाशकर्त्री रा० चित्राद्यर्द्धे पुष्यमध्ये द्विपादे पूर्वाषाढाधिष्ण्यपादे तृतीये जातः पुत्र
श्चान्तराद्येव पादे मातापित्रोर्भ्रातरं चात्मनाशम् द्विमासस्योत्तरादोषः पुष्ये चैव त्रिमासिकः पूर्वाषाढाष्टमैमा
सित्रिचाषाण्मासिकं फलमनं वमासं तथाश्लेषामूलेचैवाष्टवर्षकम् ज्येष्ठापंचदशमासं वर्जयेत्तु न दर्शनम्

१२
राम०
१२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वामुतार्थी

विलुः आश्लेषांसैर्वतीयोनक्षत्रजातिरतिविधौरेवतीमाश्विनीवाज्येष्ठांमूलंमघांवानिपुराणतरमतिर्वीर्यसं
पातयुक्तः रात्रौमातृर्विहन्यात्पितरमपिदिवासंध्ययोरात्मदेहंगंडादोगुरुकांतेसभवतिनियतंनिर्भयुः सर्वं
देव [illegible] शांतौषधीमूलमृदंबुरत्नैः सद्वीजगर्भैः कलशैः समंत्रैः कुर्याज्जनित्रीपितृबालकानांस्नानंशुभा
र्थंसहहोमदानैः [illegible] अभुक्तमूलव्यतिरिक्तगंडदोषेषुशांतिंविदधीतधीमान् शास्त्रोक्तरीत्याखलुसू
तकांतेमासेतृतीयेप्यथवत्सरांते कुर्याच्छांतिंस्वऋक्षेवातद्दोषस्यापनुत्तये [illegible] विस्वर्गेशुचिमोष्ठपदेषमाघेमू
लंभुविश्रावणेचैत्रपौषे ऊर्जेप्यधस्तान्नुतपस्यमार्गेवैशाखशुक्रेष्वशुभंचतत्र [illegible] मूलाद्यपादेदिवसेयदिस्या
त्तज्जः पितुर्नाशनकारणंस्यात् द्वितीयपादेदिनगेयदिस्यात्तमातुरल्पोपितृदास्तिदोषः एतद्द्वैपरीत्यद्वयोःशु
भमशुभंक्रमेण [illegible] [illegible] अर्ककांतगतागतान्नुनरुहानाशाप्रभान्यतोवृद्धोभवित
यंततस्तत्कृषिकृद्घातायमूलत्रये विहृस्थानांनवकंतदंतरगतेस्यात्तांश्रियेपंचके पश्चान्नपत्रितयंतदत्रकथितं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु॰र॰ १३ वक्रेश्रुभंलांगले हस्ताद्दौवृषनाशायमत्रयंसूर्यभुक्तभात् त्रयमेवृद्धौत्रयंलक्ष्म्यैसौम्यपार्श्वेचपंचकम्
मूलत्रयेपितवकंमरणायमस्यपंचकम् श्रियैपुच्छत्रयेश्रेष्ठंस्यान्नक्रेलांगलेशुभे ३ ५सु ३ ३ व॰मृ॰दु॰
भ्रुवक्षिप्रचरेषुमूलमघाविशाखासहितेषुभेषु हलप्रवाहंप्रथमंप्रकुर्यान्नीरोग १२ ५सु ३ ३
न्वितसौरभेयैः॥ग्रंथांतरेपि अर्कगतागतसंख्यभत्रितयंनेष्टमुभयतस्त्विष्टम्॥षोडश ३सु विष्टंनववकंशिष्टम ३ ३ मु॰का॰
निष्टंचलांगलेवक्रे त्रिकंत्रिकंशशांकदाः पंचकंचत्रिकंक्रमात् सूर्यभुक्तक्षतोलेख्यंदंडमूलात्तुलांगले व॰
शक्तियुक्तेमृगजनयेवंद्रेवेवार्किधरणीसुतैः बलहीनैर्हिमकिरणोलाभेजीवेकृषिःक्रियालग्ने भवारिपुसह
जैः पापैस्त्रिकोणकेंद्रस्थितैःसौम्यैः कृष्यंतेषुचधिष्ण्येषपिशुभलग्नेवीजवापनकार्यम् ० हस्ताश्वि
पुष्योत्तररोहिणीस्वातिचित्रानुराधामृगरेवतीषु स्वातौधनिष्ठासुमघासुमूलेवीजोप्तिरुत्कृष्टफलप्रदिष्टा मृद्वि राम॰ १३
लांगलेत्रयंचकोरेविहस्यानिचद्वादशस्यात्सुखेमवतुष्टयवहिनतोभानामिदंपंचकम् इत्थंकज्जलमंत्रेवृक्षि

जै२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अति वृष्टिरनावृष्टिर्मूषकाः शलभाः शुकाः॥ स्वचक्रं परचक्रं च सप्तैता ईतयः स्मृताः॥

रश्विकानिलंतुलं त्वक्रमात्स्यादीतिं प्रभवं भयं च फणिभाद्धीज्ञोभिकाले स्फुटम् फणिचक्रे सूर्यभादपि केभ्विदुक्तम् ॥ ध्रुवमृदुलघुवर्गे वासवे विष्णुदेवे विकुजरविजवारे केंद्रको



णेषु सत्सु द्वितनुवृषभयोश्चाप्युक्रमे चंद्रसुद्धौ सुतिथिकरणयोगे दर्शने भूपतीनाम् मृदुध्रुवक्षिप्रचरेषु भेषु योगे प्रशस्ते शनिचंद्रवर्जे वारे तिथौ पूर्णजयाह्वये च मुद्राप्रदिष्टा सुभदान्टपाणाम् शुक्ले च वा सिततारे च वासुदायाय घटनं क्वचित् क्रूरग्रहर्क्षलग्नेंशेन कार्यं भूमिनि कृता मुद्रासु वर्ण्यरजतादीनाम् लघुमैत्रध्रुवभे सिते दुबुधजीववारेषु हेमरजतादिभाजनभोजनमारोग्यममृतयोगे वस्त्रं धार्यं स्त्रिभिश्चक्रे शेष्याके हस्तपंचके धनिष्ठोत्तररोहिण्यां पुनर्वस्विति मह्नये रक्तवस्त्रं प्रवालानां धारणं रेवतीद्वये धनिष्ठायां तथा हस्तपंचके नार्कि सोमयोः योषाभिनांवस्तुकरादिषु पंचकेषु कौसुंभहेममणिविद्रुमकाच सं ताना यो धृतानाः स्वस्वसुतादिकरा भवति ब्राह्मणो नराधिप गुरौ न सुखाय भनु ॥ विप्रादेशाद्बुह्ना हे वीक्ष्मापालेन मोन्या

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मु.र.
१४

दत्तम् धिष्ण्ये वारे निंद्येप्याहुर्नूतनं नव्यं वस्त्रं धार्यम् क्षिप्रचलाचलमृदुभे रिक्तामावर्जितेषु दिवसेषु निखिलेषु च वारे
षु त्रिपुष्करे भूषणं धार्यम् स्थिरसाधारणचरभे लघुमैत्रेप्यर्कजेषु वारेषु तेषामेव विलग्ने मणिकनकमयं भूषणं धा
र्यम् क्षिप्रमृदुध्रुवचरभे शशिसितयोर्वारे च तद्लग्ने मुक्ताफलरत्नजातमयं भूषणमखिलं सवस्त्रकं धार्यम् मृ
लविष्णुवसुरेवतीमघारोहिणीकरसमीरणोत्तरे वा हरिणेषु सुभे दस्रभस्वहे लग्ने नृपपुरप्रवेशनम् स्वदितिश्र
सवंत्वाष्ट्रमैत्रमैन्दववाजिनौ स्त्रीकर्मन्तनुत्राणमेभिर्नक्षत्रैः प्रशस्यते मित्रेन्दुपुष्ययमभादितिवाजिचित्राह
स्तोत्तरात्रयहरीज्यविधातृभानि एतेष्वतीवशयनासनपादुकानां संभोगकार्यमुदितं मुनिभिः शुभाहे पौष्णाश्वि
नीपवनवासवहरीशतारक्षिप्रचित्रादितिश्रवणमित्रकरे ज्यवित्तैः वारेषु जीवशशिसूर्यसितेंदुजानामारोहणं गज
तुरंगरथेषु शस्तम् मु.र.: स्कंधे स्कंधधवैः शरैर्धवप्रियः षष्ठे दशम्ये च धनुनाशो लांगलनेत्रमेयुगपदक्षैः संग
रेलोज्जयः॥ पंचक्षैरुदरेऽश्वनाशनमिनक्षाद्दैर्घ्यलक्ष्मीर्मुखे विद्याभावोऽपमिरोहणेषु ध्ववरे श्वकेहयस्यारितम् व

रत्न.
१४

१४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शय्यासनंयुवतिजनशास्त्राभरणानुलेपनंनिखिलम् सितवासरवर्गेष्वपिकुर्वीतंशशिजीवयोर्वापि ॥ ओ
निर्मिवेध सन्नाहंकुन्तखड्गादिधारणांसवितुर्दले मिश्रेसक्रूरभैःपुंभैर्जयप्रयोगोःस्वरोदितैः पुष्पेवाक्षितिवि
त्तपमतनतपेशाक्रोतररोसन्नाहंशरखड्गकुंतछुरिकाधार्यान्नृपोणादिना क्रूरैस्तीक्ष्णेष्वमिश्रेष्वशस्त्रकर्मा
णिकारयेत् शनीज्यारार्कवारेषुध्रुववैणगेविशेषतः गजाश्वकर्मशंसंतिमृगेपुष्येपुनर्वसौरेवत्यश्वानुराधा
सुत्र्येहस्ताच्युतेरपि नकुर्याद्दंतिनांदंतच्छेदंगुरुहटहेखौ हरौशुभेसितेपक्षेरात्रौभौमार्कवासरे शुभभावेशुभे
लग्नेशुभांशेयोभुक्तेतिथौ स्वैकुशाःकरिणांयोज्याःशनिलग्नेशनेर्दिने क्रयपक्षेविक्रयोनेष्टोविक्रयपक्षेक्रयो
पिन पौष्णांवुपाश्विनीवातश्रवश्चित्राक्रयेशुभाः पूर्वाद्वीशाक्रयाम्नुसार्पयमभेकेंद्रत्रिकोणगैःशुभैः षट्त्र्यायेष
शुभैर्विनाघटतनुंसत्रिक्रयःसत्तिथौ रिक्तांभौमघटान्विनाचविपणिमैत्रध्रुवक्षिप्रभेर्लग्नेचंद्रसितेज्यपापाष्टर
हितैःपापैःशुभैर्व्ययपरे ॥ लग्नगतेतुहिनकरेत्रिकोणकेंद्रस्थितैःशुभदैः सततघटभंहित्वाथपत्तरांपकर्मेला

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मदंभवति शुभखचराघटराशिंविसृज्यधनलाभलग्नकर्मस्थाः अन्यथात्वशुभखगा विपरीतार्यदिसंतुभार्गवे
योगे शुभप्रवेशस्थानानि पञ्चानां नो नराचये· दर्शेऽष्टमीचतुर्दश्योरोहिण्यां कृत्तिचित्रयोः तीक्ष्णोग्रमूनांदमनंस
रेस्याच्छुभ्रमरोधराम् मृदौदीक्षाव्रतंकुर्याद्देवेचारणपकंगृहम् शान्तिकंपौष्टिकंकार्यं [illegible] ज्येष्ठ्यशुक्रार्केवासरे
कन्याविवाहनक्षत्रेपुष्याश्विश्रवणेतथा शुभे नवान्नंस्याच्चरक्षिप्रमृदुभेसन्तनौशुभम् विनान्नंदाविष
घटीमधुपौषार्किभूमिजान् मूलाश्विमैत्रकरतिष्यहरीन्द्रभेषुपौष्णानलैन्दवपुनर्वसुवासवेषु वारेषुभूमितन
यार्कजवर्जितेषुताम्बूलनूतनदलाशनंशुभाय हस्तःपुनर्वसुमैत्रंस्वातीमूलंमृगोऽश्विनी उत्तरावैष्णवंचित्रा
रोहिणीचफलप्रदा शाक्षादौनवपुष्पेषुवार्त्ताकादिफलेषुच नवान्नेनवमघेचशोभनानिस्मृतानिवै मघा
रेभरणीमाचार्यैरन्त्येपैत्र्येशशार्पभेः मूलवारुणयाम्येषुत्रिपूर्वाशाक्रभेः शुभम् सुधायोगेसुधाभ्भः कर्त्तव्यो
मनुजोदये शुक्रेचचन्द्रेचकेन्द्रस्थेतत्पानंचशनौदिने [illegible] गलगतेसुरसत्रिवेदशभस्थैः क्रूरखेचरैरविबलैः प्रव

15

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ज्याह्वपुष्ययोगेज्ञानस्यग्रहणंमुमुक्षुभिःकार्यम् मुनिः क्षिप्रेमैत्रेवित्तस्थितार्केऽर्कवारेसौम्येलग्नेकेन्द्रकुजेवास्वलाभे
योनेमैत्र्यांराशियोन्यापिमैत्र्यांसेवाकार्यास्वामिनःसेवकेन शुभलग्नेदशमभवेरवौकुजेवाथतद्वर्गे स्थांशुवि
धाकार्यान्नृपसेवावैरिनिग्रहःकार्यः कर्मोत्पन्नैर्धनमेवंस्वर्गेत्वर्थसंग्रहःकार्यः बुधलग्नेदशमगतेभौमेचौ
र्यस्यमृत्युकालःस्यात् साधारणोग्रक्रूरदारुणाक्षेनिक्षिप्तमर्पितंत्वथवाप्तनष्टम् चौरैर्हृतंदत्तमुपात्तवंचा
विहृत्याचपातेनतुलभ्यतेतत् मुनिः स्वात्यादित्यमृदुद्विदैवगुरुभेकर्णत्रयाश्विवरलग्नेधर्मसुताष्टशुद्धि
सहितेद्व्यप्रयोगःशुभः तारेमाहममृगांतुसक्रमदिनेद्व्रैकरेकेन्द्रियत्र्यंशेशुभवेद्दानंबुधेदेयंकुजाचिह्न
नम् मुनिः ऋणंभौमेनगृह्णीयान्नदेयंबुधवासरे ऋणच्छेदंकुजेकुर्यात्संचयंसोमनंदने श्रवणोत्रयविशा
खाश्वपुनर्वसुतिष्योऽम्बुसमंत्रभिन्नत्यजपेष्टाधनधान्यविवर्धनेशस्ताः मित्रे[illegible]पौष्णोत्तरारोहिणीषुदेवेज्य
वाजीश्वरवारिभेषु प्रारंभणंसर्वजलाशयानांकार्यंसितेंदुशक्रवा[illegible]रलग्ने चित्राश्विनीदितिपुनर्वसुहस्तमृगाश्रोमूला

मु.१.
१६

श्विनीरोहिणीहस्तः पुष्यधनिष्ठके शतभिषामित्रोत्तरारेवती एतेष्वृक्षेश्रवणाश्वितेषु मकरे कुंभे च लग्नेत्वजे
वापीकूपजलाशयादिखननंकार्यं [redacted] प्रशस्ते [redacted] दिने इतिव्यवहारोच्चये मार्तंडेंदूरुमुहूर्तमुरजिद्दशयनेमा
घषट्कस्यमुक्तेमूलाषाढोत्तराश्विश्रवणागुरुकरेपौष्णशाक्रेऽपचांद्रे मैत्रेब्राह्मेचपूर्णामदनरविनिथोसद्वि
तीयातृतीयेकार्यातोयप्रतिष्ठाह्यगुरुसितदिनेकालशुद्धौसुलग्ने सावित्रतिष्याश्विनवारुणानिमूलंविश्रा
रवाब्धमृदुक्षवासि लग्नेषधीपादपरोपणेषुशस्तानिभानिप्रतिपादितानि पूर्वात्रयेमूलमृगादिपंचतथा
श्विनीषुत्रितयेचहस्तात् सविस्तुधिष्ण्येष्वपिसर्वविद्यामारंभइष्टः शुभवासरेषु मु.चू. पूर्वाश्विमूलत्वहरिभे
षुमृगादिपंचस्वर्कत्रिषुस्वपभषाशितधनेतौनसौम्ये विद्यापठेदुपचयस्थखलेकुजाज्ञानध्याय १।८।१४।१५।
३० मंदत्र्यांतंदपुगसरोतेने श्री विद्यारंभःसुरगुरुसितज्ञेषमीष्टार्थदायीकर्मुष्यापुष्विरमपिकरोत्सस्मृमा
त्मध्यमोत्र नीहारांशौभवतिजडतापंचतामन्त्रिपुत्रे षष्ठ्यापास्तावपिचमुनयःकीर्तयन्त्येवमाद्याः ज्योतिर्निब

राम०
१६

16

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धे विद्यारंभे गुरुः श्रेष्ठो बुधश्चारोग्यभार्गवः मध्यमौ रविचंद्रौ च शनिभौमौ च वर्जयेत् ॥ अदितिगुरुयमार्कस्वातिचित्रा
श्विपित्र्यश्रवहरिवसुमूलाश्वीन्दुमान्यांत्यभेषु विशनिशशिबुधाहे विष्णुबोधे विपौषे सुसमयतिथि योगे स्वाध्यायवि
द्यामदानम् श्रुतिस्मृतिपुराणादिश्रोतॄणां धर्मकर्मणाम् गुरुजन्मत्रिकोणेषु आरंभः सद्भिरिष्यते ॥ तिस्वातिरामि
त्रगुरुश्रविष्टाहस्तेनुवारीश्वरपौष्णभेषु संगीतविद्यादिसमस्तकर्मकार्यं विभौमार्कजवासरेषु उत्तरात्रयमैत्रेंदु
वसुवारुणाभेषु चपुष्यार्कपौष्णधिष्ण्येषु नृत्यारंभः प्रशस्यते लग्ने संस्थे बुधे चंद्रे जराशौ गुरुवीक्षिते शुभग्रहे स्व
तुर्थस्थे नौकारंभः प्रशस्यते ॥ मिषजं शुभदं मूले वतुरंगजकर्मभे मृत्स्फदः स्वातिपूर्वार्द्रज्येष्ठाश्लेषोद्भवो गदः
मु॰चू॰ मुक्तं विष्टिंचयात्राप्यायनमशुभविधुं ४।८।१२ वैधृतिं मा दृक्पाते कुंभांत्यपंदुसितेज्यास्तमपि च परिघार्कीस्म
रा ३ द्वित्रिपद्भस्य कांत्यक्षेभूत १४ नंदे २ ऋद्धि ११ त्रिजन्मिमृत्यु जन्मोग्रदाहः स्मरार्धाश्राद्धे पिंडोप्यनंदा घमघ च वि
हितेमादिपक्षेषु चेतन क्षिप्राहिमूलेंद्रेष्वाग्यांशकेदेचसमीरभे विष्णुभे सुभदं प्रोक्तं प्रेतकार्यं मनीषिभिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु·र· स्तोऽशांबुपभेश्वस्य दहनं न्यूनाधिमासे न सत्कर्तुः स्यात्परिभे पा१४१२३ भगाश्रितिविशाखाजांघ्रिभे सक्रवे मैत्रेम
१७ ध्यमथेज्यचंद्रदिनकृद्वारे हरिक्षिप्रभस्वातौ श्रेष्ठमिदं विचारमपरं त्वाशौचनस्त्वाखिलम् ॥ १० ॥ वासवोत्तरदलादिपं
चके याम्यदिग्गमनगेहगोपनम् प्रेतदाहतृणकाष्ठसंग्रहं शय्यकावितननं च वर्जयेत् ॥ ११ ॥ हस्तत्रये पुष्यपुनर्वसौ
च विष्णुत्रये चाश्विनपौष्णभेषु मित्रेंदुमूलेषु च सूर्यवारे भेषज्यमुक्तं कुजवासरे च निधनारिमन्मथभवने [redacted] सु
द्धेषु भेषु बलवत्सु वरसिद्ध्यमृतयोगेत्वौषधसेवा सुवीर्यदा तत्र ॥ १२ ॥ शशितनयेज्यौ वा चंद्रे वा लग्नगे [redacted] व
लिनि तद्वर्गे वा लग्नगते शिल्पारंभः प्रशस्यते सततम् ॥ १३ ॥ मृदुध्रुवक्षिप्रचरे ज्ञे गुरौ वा स्वलग्नगे विधौ ज्ञ
६३ जीववर्गस्थे शिल्पविद्या प्रशस्यते ॥ त्वाष्ट्रामित्रकभाद्रये वेपुपलघुश्रोत्रे शिरामोक्षणं भौमार्केज्यदिने विरेक
वमनाद्यं स्याद्बुधार्की विना ॥ मित्रक्षिप्रचरध्रुवे रविसुभे होलमवर्गे विदो जीवस्याथ पितनो गुरौ निजदिनांशे मेक्षिमा
सद्दले त्रिविक्रमः स्नानं नाकोरसुकेऽस्य विषमे संक्रांतिपर्वसु हृष्टांकादिकृत्तपादे स्पर्शे हिषक्तमघा त्रिभैः ३ रत्न० १७

दमामलकस्नानविषयम् भीमपराक्रमे सौम्यार्कपुष्यर्क्षतिरेवतीषु स्नानेऽधनिष्ठासु कुजार्कवारे शुभेच्छयो
गेभगलिंगकादिष्ठे घनधारेऽर नरवाजिनां च मुक्तिं स्वात्यादितिश्रवणमघानिलसार्प्यधिष्ण्ये रिक्ते तिथौ चरतनौ
विकवीन्दुवारे स्नानं रुजाविरहितस्य जनस्य शस्तं हीने विधौ स्वल्पखगे भवकेंद्रकोणे श्री· लग्ने वरे सूर्यकुजा
र्किवारे रिक्तातिथौ चंद्रबले विहीने।।केंद्रत्रिकोणारिगतैश्च पापैः स्नानं हितं रोगविमुक्तकानाम् चंडेश्वरः।व्यतिपाते
विष्टिदिवसे दिवसेरविभ्रमितदनानाम् स्नायीत व्रणामुक्तो हस्तभेतारेते याशशिनि।। हयः पुष्पस्तथा स्वे ष्ठाश्रव
णाम्लगाशिरस्तथा शुभान्येतानि रुक्ता रोगिस्नानेकृष्णगतेतमो शुभः वसुदस्रकरादिपंचके दितियुग्मे शुक्रधा
